CC-0. Nepal Sanskrit Academy, Kathmandu

## नेपालराष्ट्रियपुस्तकालयस्थहस्तलिखितपुस्तकानाम्

# सूचीपत्रम्

### प्रथमो भागः

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

श्री ५ महाराजाधिराजानां
४५ तमशुभजन्मोत्सवावसरे प्रकाशितम्

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

## नेपालराष्ट्रियपुस्तकालयस्थहस्तलिखितपुस्तकानाम्

# सूचीपत्रम्

यस्यायं

बौद्धदर्शनविषयः

प्रथमो भागः

तस्यायं प्रथमखण्डः

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

पुरातत्त्वग्रन्थमाला २६
प्रथमसंस्करणम् १०००

श्रीनारायणप्रसा शर्मण अध्यक्षतायाम्
ज्योतिषाचार्य महेन्द्रविद्याभूषण पण्डित देवीप्रसाद लंसालेन
संपादितम्

नेपालराष्ट्रियपुस्कायतः प्रकाशितम्

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu



# दुई शब्द

ज्ञानको सागर अगम र अपार छ। मानव जीवनको छोटो अवधिमा ज्ञानको विशद भण्डारको सर्वाङ्गीनथाह पाउन कठिन मात्र होइन, असम्भव छ भने पनि हुन्छ। सम्भवता यही कारणले होला, विद्यारूपि सागरलाई विभिन्न शाखा प्रशाखामा विभाजित गरेर कुनै एक विषयको पूरा ज्ञान प्राप्त गर्न सकिने व्यवस्था मिलाउने उद्देश्यले नै विभिन्न शास्त्रहरूको छुट्टा छुटै वर्गीकरण गरी अध्ययन खर्ने प्रचलन हाम्रा माननीय पुर्खाहरूले चलायेका होलान्। आधुनिक विज्ञान युगले मुद्रण यन्त्रलाइ जन्म दिनु भन्दा पूर्व पुस्तकहरूको प्राप्ति आज जस्तो सुलभ थियेन। कुनै यौटा पुस्तकको प्रतिलिपि तयार गर्न पर्याप्त समय लाग्दथ्यो र त्यसको मूल्य तिरेर त्यसबाट विशेष लाभ उठाउन सर्वसाधारणलाई गाह्रै पर्दथ्यो। तर मुद्रण कलाको आविष्कारको साथै विस्तार विस्तार हस्तलिखित किताबहरूको प्रचलन हराउँदै गयो र आज सर्वसाधारणले सुलभमोलमा मुद्रित पुस्तकहरू प्राप्त गर्न सक्छन्।

तर मुद्रण कलाको आविस्कार हुन भन्दा पूर्व जे जति कृतिहरू लेखिये, ती सबैको विशिष्ट महत्व छ। आज यस प्रकारका महत्वपूर्ण हस्तलिखित कृतिहरू जहाँ सुकै प्राप्य छैनन् र देशका प्रमुख पुस्तकालयहरूमा मात्र तिनिहरूको यथाशक्य सङ्कलन गरिएको हुन्छ। यो हाम्रो देशमा मात्र नभै प्रत्येक देशका मुख्य पुस्ताकालयहरूले विशेष ध्यानदियेर सङ्कलन गरेका हुन्छन्। यिनमा देशको प्राचीन सभ्यता, संस्कृति र परम्परा प्रतिविम्वित भएको हुन्छ। सबै देशहरूका हस्तलिखिय पुस्तकहरूको विशिष्ट महत्वमानिन्छ र सुरक्षाका निमित्त "माइको फिल्म" गरेर राख्ने चलन पनि छ। यो प्रथा न्यायसङ्गत पनि हो किनभने हस्तलिखित कृतिहरू कुनै पनि देशका ती कृतिहरू हुंन्छन् जो पुन दोहोरिंदैनन्। अतः यिनको उचित संरक्षण अत्यावश्यकछ।

हस्तलिखित पुस्तकहरूका सम्बन्धमा हाम्रो देशले विशेष गर्व गर्न सक्दछ। राष्ट्रको प्राचीनतम पुस्तकालय "वीर पुस्तकालयमा" हजारौंको संख्यामा महत्वपूर्ण हस्तलिखित कृतिहरूको संकलन छ र यस राष्ट्रिय पुस्तकालयमा सनेत विभिन्न विषयका मुद्रित पुस्तकहरूको साथै महत्वपूर्ण हस्तलिखित ग्रन्थहरूको पनि सङ्कलव छ। तर केवल पुस्तकहरूको संकलन भयेर मात्र पाठकवर्गले सरलतापुर्वक लाभ उठाउन सक्दैनन्। पुस्तकालय रूपि विशाल भण्डारमा अमुक वस्तु अमुक स्थानमा र कमजा छ भन्ने ज्ञान

CC-0. Nepal Sanskrit Academy, Kathmandu



नभए सम्म इच्छित पुस्तकको तत्कालै प्राप्ति कठिनमात्र ह्वैन अपितु असम्भव हुंन जान्छ। अतः पुस्तकालयको मुट्ट हो सम्पूर्ण-ग्रन्थहरूको वर्गीकरण द्वारा पृथक् विषयको अनुक्रमणिका र विषय स्पष्ट वैज्ञानिक सूचिपत्र।

राष्ट्रिय पुस्तकालय अझै आफ्नो शैशवावस्थामै छ र यसले अन्य कतिपय कार्यहरू सम्पादन गर्न बाँकिनैछतापनि पुस्तकहरूको वैज्ञानिक ढङ्गले क्रमिक चरित्र खिचेर सूचि निर्माण न गरूञ्जेलसम्म पुस्तकालयको प्रशासन सदैव दयनीय नै देखा पर्ने र पुस्तकालयको नाभिनै सूचिपुस्तिका भएकोले यसको अभावमा अनुसन्धान कर्तातथा पाठकवर्गलाई दुःखहुनाका साथै संस्थाको मर्यादामा समेत धक्का लाग्न जाने हुंदा पुस्तकालयमा रहेकार अब थपहुने विभिन्न विषयहरुको विभाजन गरी सूचिपत्र प्रकाशित गर्दै लैजाने अठोर यस पुस्तकालयले गरेको छ। यसै क्रममा यस पुस्तकालयमा रहेका विभिन्न विषयका हस्तलिखित ग्रन्थ हरुमध्ये बौद्धशास्त्र, बौद्धदर्शन विषयको यो प्रथयसूची श्री ५ महाराजाधिराज सरकारको ४५ सौ शुभजन्मोत्सवको उपलक्षमा प्रकाशनमाल्याउन पाउंदा पुस्तकालयले हर्ष अनुभव गरेको छ बाकि बौद्धग्रन्थ हरुको सूचियसको दोश्रो भागमा पूरा हुनेछ। पुस्तकालयका अनुपम सहयोगी उपाध्य श्री शङ्करनाथअधिकारी कर्मचारी हरु तथा यस सूचिको प्रकाशनमा विशेष परिश्रम गर्ने पं. देवीप्रसाद लंसाल र पं यज्ञाननन्द गुभाज्यू विशेष धन्यवादका पात्र हुनुहुन्छ।

सूचिपत्र छाप्ने तर्फ पुस्तकालयको यो प्रथम प्रयासहो र अब यथाशीघ्रप्रकाशनमा ल्याइने विविध विषयका सूचिपत्रहरु सबैको निमित्त रुचिकर र उपयोगी सिद्धहुनेछन्‌भन्ने आशा र विश्वास छ।

काठमाडौं नारायणप्रसादशर्मा

मिति—२०२१।२।२६।५ अध्यक्ष

नेपालराष्ट्रिय पुस्तकालय

CC-0. Nepal Sanskrit Academy, Kathmandu



# अथ बौद्ध दर्शनग्रन्थाः

## अध्यात्मसार टीका

(प्राकृत मूलश्लोकानां संस्कृतभाषयाव्याख्या)

क्रमाङ्कः २५४

विषयाङ्कः १

ग्रन्थकारः .... .... ...। नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ७। आकारः ६×४। ग्रन्थसंख्या ७५०। पत्रसंख्या ३६।

आदिवाक्यम्—

ॐ नमः श्रीवज्रसत्वाय

नत्वा देवीमसमसुखदामुग्रतारामजस्र—
मासंसारं सुगदचरणं धर्मयुक्तं स संघम्।
शश्वत्पादारविन्दे गुरुमपि च तथाऽध्यात्मसारस्य चार्थं
वक्ष्ये संक्षेपतोऽद्य प्रवर गुणगणं शिष्यवाञ्छानुरोधात्॥

यथा वाञ्छा च बन्धूनां हृत्कीर्तिंनूपराजयोः।
तथोवाच तथा शक्त्या त्वालापोऽर्थ शिरोमणिः॥

एकानेक व्युपरतिसुखैः सिद्धचारैरनेकैः
चित्यादीनां नमिलतियतो वस्तुसिद्धिः कुहापि।
विज्ञानान्तं तदिहसकलं निःस्वभावं समन्ता—
न्नैवाकस्मात्स्फुरति नियमाद्देशकालाकृतीनाम्॥

नमिलति नलगति का वस्तु सिद्धिः। तेषां चित्यादीनां कथं कुहापि कुत्रापि कुतोऽपि। कैःसिद्धचारैः सिद्धविचारैः। कथं भूतैः, अनेकैः। पुनः कथं भूतैः एका

CC-0. Nepal Sanskrit Academy, Kathmandu



नेकव्युपरतिसुखैः । अस्ति किं बत्सकलम् । कथं भूतं विज्ञानान्तम् ॥

अन्तवाक्यम्—

एवं चाष्टादश शत मरुत्पञ्चदण्डानुवृद्ध्या—

सङ्क्रान्तिनां व्यधिकदशधा सङ्गतीनां निरोधात् ।

मग्नःसौख्ये निवसति सदाहर्निशं षष्टिदण्डात्

संम्यक्सिद्धस्तदनु गदितो द्वादशान्त्येश्वरःस्यात् ॥

एकैकस्याः पुनरिह भुवोऽनेक कार्याद्विवृद्धे—

र्यत्किंचित्तर्द्धैः कति कति विधं शक्यते वर्णनं तत् ।

एतावत्तत्प्रथमसुवमादाय शक्यं च वक्तुम्

अतःपरं खण्डितम् ।

## अपरिमितायुर्महायानसूत्रम्

क्रमाङ्कः १८७ विषयाङ्कः २

ग्रन्थकारः ···· ···· ··· । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५ ।
आकारः ११×३ । ग्रन्थसंख्या १८० पत्रसंख्या १३ ।

आदिवाक्यम्—

ॐ नमः सर्वबुद्धबोधिसत्वेभ्यः

एवं मया श्रुतमेकस्मिन्समये भगवान् श्रावस्त्यां विहरतिस्म । जेतवनेऽनाथ पिण्डदस्यारामे महता भिक्षुसंघेन सार्द्ध त्रयोदशभि र्भिक्षुशतैः संवहुलैश्च बोधिसत्वै-र्महासत्वैः । तत्र खलु भगवान्मञ्जुश्रीयं कुमारभूतमामन्त्रयतिस्म । अस्ति मञ्जुश्री रुपरिष्टाद्दिशि । अपरिमितगुणसञ्चयोनाम लोकधातु स्तत्राऽपरिमितायुर्ज्ञान सुविनि-श्चित तेजोनाम तथागतोऽर्हन्त संम्यक्संम्बुद्ध विद्याचरण सम्पन्न सुगतो लोक विदनुत्तर पुरुषदम्य सारथिशास्ता देवानां च मनुष्याणां च बुद्धो भगवान् तर्हि

CC-0. Nepal Sanskrit Academy, Kathmandu



तिष्ठति भ्रियते जायन्ति ॥ सत्वानां च धर्म्मं देशयन्ति । शृणु मञ्जुश्रीकुमार भूत इमे जम्बुद्वीपका मनुष्या अल्पायुषा वर्षशतायुषाश्च भविष्यन्ति ॥

पुष्पिकावाक्यम्—

आर्य अपरिमितायुर्महायान सूत्रं समाप्तम् ।

## अपरिमितायुर्महायानसूत्रम्

क्रमाङ्कः १८८

विषयाङ्कः ३

ग्रन्थकारः .... .... .... । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ५ । आकारः ११×४ । ग्रन्थसंख्या १८० । पत्रसंख्या २० ।

संवत् ६६५ साल मिति पौषकृष्णया २ रोज १ स भिञ्चवाहालया वज्राचार्य श्री चतुरानन्देन लिखितम् ।

## अपोहसिद्धिः

क्रमाङ्कः २५६

विषयाङ्कः ४

ग्रन्थकारः— रत्नकीर्तिः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ७ । आकारः १३×४$\frac{१}{२}$ । ग्रन्थसंख्या २१० । पत्रसंख्या ११ ।

आदिवाक्यम्—

ॐ नमः श्रीलोकनाथाय ।

अपोह शब्दार्थो निरुप्यते । ननुकोऽयमपोहनाम किमिदम् अन्यस्मादपोह्यते अस्मा द्वा, अन्यदपोह्यते, अस्मिन् वान्यदपोह्यते व्युत्पत्या विजाति व्यावृतं वाह्यमेव विवक्षितं बुध्याकारो वा यदि वा, अपोहनं, अपोह इत्यन्य व्यावृतिमात्रं इति त्रयःपक्षाः । नतावदादिमौ पक्षौ, अपोहनाम्ना विधेरेव विवक्षितत्वात् । अन्ति-

CC-0. Nepal Sanskrit Academy, Kathmandu



मोऽप्यसङ्गतः प्रतीतिराधितत्वा त्तथा हि पर्वतदेशे वन्हि रस्तीति शाब्दि प्रतीति निवृत्तिमात्रमामुखुयन्ति । यच्च प्रत्यक्ष वाधितं न तत्र साधनान्तरावकाश इत्यति प्रसिद्धम् ।

अन्तिमंवाक्यम्—

शब्दे स्तावन्मुख्यमाख्यायतेऽर्थस्तत्रापोह—हणत्वेन गम्य ।
अर्थश्चै कोऽध्यासतो भाषतोऽस्थाप्यावाच्यस्तत्ततोनैवकश्चित् ।
अपोहसिद्धिः समाप्तः ॥.
कृतिरियंमहापण्डित रत्नकीर्तिपादानाम् ॥

## अभिधर्मकोशकारिका

क्रमाङ्कः २६४ विषयाङ्कः ५

ग्रन्थकारः– आर्यवसुबन्धुः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः.... ग्रन्थसंख्या १८१ । पत्रसंख्या २१ । अपूर्णा ।

आदिवाक्यम्—

यःसर्वथा सर्व हतान्धकारः संसारपङ्काज्जगदुज्जहार ।
तस्मै नमस्कृत्य यथार्थ शास्त्रे शास्त्रं प्रवक्ष्याम्यभिधर्मकोशम् ॥
प्रज्ञाऽमलासानुचराऽभिधर्मस्तत्प्राप्तये यापि च यच्च शास्त्रम् ।
तस्यार्थतोऽस्मिन्समनुप्रवेशात् स वाऽऽश्रयोऽस्येत्यभिधर्मकोशः ॥

धर्माणां प्रविचयमन्तरेण नास्ति क्लेशानां यत उपशान्तयेऽभ्युपायः ।
क्लेशैश्च भ्रमति भवार्णवेऽत्र लोकस्तद्धे तोरुदित (तेद्धतोरतउदितः) किलैपशास्त्रः ॥

शास्त्रवा नास्रवा धर्माः संस्कृता मार्ग वर्जिताः ।
स्रास्रवा आस्रवा स्तेषु यस्मात्समनु शेरते ॥

CC-0. Nepal Sanskrit Academy, Kathmandu



अनासूवा मार्गसत्यं त्रिविधं चाप्य संस्कृतम् ।
आकाशं द्वौ निरोधौ च तत्राकाशमनावृतिः ॥

अन्तवाक्यम्—

संजीवादिषुषड्स्त्रायुस्तैस्तेषां कामदेववत् ।
अहोरात्रायनेऽची — — — दत्र कल्पं पुनः पुनः ॥
कल्पं तिरश्चां प्रे — — — मासाह्वा शतपञ्चकम् ।

अतः परं खण्डितम् ।

पुष्पिकावाक्यानि—

धातुनिर्देशोनाम प्रथम कोशस्थानम् ।
इतीन्द्रिय निर्देशोनाम द्वितीयं कोशस्थानम् ।

## अभिधर्मकोशकारिका

क्रमाङ्कः ७४४ विषयाङ्कः ६

ग्रन्थकारः — वसुबन्धुः । नेपालीयं कागतम् । देवनागरी लिपिः ।
पङ्क्तयः १८ ।आकारः ८×६½ । ग्रन्थसंख्या २०४ । पत्रसंख्या २६ ।

पुष्पिकावाक्यामि—

धातुनिर्देशोनाम प्रथमं कोशस्थानम् ।
इतीन्द्रिय निर्देशोनाम द्वितीयं कोशस्थानम्
इति लोको निर्देशोनाम तृतीयं कोशस्थानम् ।

अन्तएाक्यम्—

CC-0. Nepal Sanskrit Academy, Kathmandu



कामेऽपि निवृता नास्ति समुत्थान मसद्यतः ।
परमार्थ शुभो मोक्षः स्वतो मूलं ह्यपत्रपा ॥
संप्रयोगेण — — — — —

अतः परं खण्डितम् ।

## अभिधर्मकोषः

क्रमाङ्कः ७४४६ विषयाङ्कः ७

ग्रन्थकारः — — — । ताड़पत्राणि । नेवारी लिपिः । पङ्क्तयः ६ ।
आकारः १२ ×२½ । ग्रन्थसंख्या १८० । पत्रसंख्या ११ । अपूर्णः ।

## अभिधर्मकोशव्याख्या

क्रमाङ्कः २४६ विषयाङ्कः ८

व्याख्याकारः– यशोमित्रः । नेपालीयं कागतम् । देवनागरी लिपिः ।
पङ्क्तयः १३ । आकारः १३×५ । ग्रन्थसंख्या १५११२ । पत्रसंख्या ३६४ ।

आदिवाक्यम्—

नमो मारबलप्रमथनाय । नमोरत्नत्रयाय ।
महाबलो ज्ञानसमाधि दन्तो यः पञ्जरं जन्ममयं विदार्य ।
विवेश निवृत्यटवीं प्रशान्तां तं शास्तृनागं शिरसा नमामि ॥
परमार्थ शास्तृकृत्या कुर्वाणं शास्तृकृत्यमिव लोके ।
यं बुद्धिमतामग्र्यं द्वितीयमिव बुद्धमित्याहुः ॥
तेन वसुबन्धुनाम्ना भविष्य परमार्थ बन्धुना जगतः ।
अभिधर्म प्रत्यासः कृतोऽयमभिधर्मकोशाख्यः ॥
अभिधर्म भाष्य सागर समुद्धृतस्यास्य शास्त्रस्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu



व्याख्या मया कृतेयं यथार्थ नामा स्फुटार्थेति ॥
गुणमति वसुमित्राद्यै र्व्याख्याकारैः पदार्थ विवृतिर्या ।
सुकृता नाभिमता मे लिखिता च तथायमर्थ इति ॥
सिद्धार्थापसृता क्वचित्क्वचिद्यातु तैः कृता व्याख्या ।
तामुद्भाव्य यथावद्विहिते मयान्यथा व्याख्या ॥
अभिधर्म विभाषायां कृतश्रमा येऽभिधर्मकोशे च ।
अविचार्यमामियं ते व्याख्या युक्ता नवा युक्ता ॥
युक्ता चेद्ग्राह्ये यं न चेदतो ह्यन्यथा विधातव्या ।
नहि विषयेऽर्थे सुवलितुं न संभवेन्मादृशां बुद्धिः ॥

यः सर्वथा सर्वहतान्धकारः संसार पङ्काज्जगदुज्जहार ।
तस्मै नमस्कृत्य यथार्थ शास्त्रे शास्त्रं प्रवक्ष्याम्यभिधर्मकोशम् ॥

इत्यस्य श्लोकस्यार्थ विवृण्वान् आचार्य आह—
शास्त्रं प्रणेतुकामः स्वस्य शास्तुर्महात्म्यज्ञापनार्थ गुणाख्यानपूर्वकं तस्मै नमस्कारमारभत इति ।

शास्त्रमभिधर्मकोशं प्रणेतुकामः कर्तु कामः स्वस्यशास्तु रात्मीयस्य शास्तुः सहि भगवानाचार्यस्यात्मीयः शास्ता तच्छासन प्रतिपन्नत्वात् । तेन वा शास्ता महाकरुणा परतन्त्रेण सकललोकः सत्वेन परिगृहीतः। तस्मादाचार्यस्यापि स्वत्वेन गृहीतस्य सभगवान् स्वः शास्ता भवति । महात्म्य ज्ञापनार्थ मिति महात्मत्व महात्म्य स्वपरार्थ प्रतिपत्तिः सम्पत् । तज्जज्ञापनार्थं तदवबोधार्थं गुणाख्यान पूर्वकं गुणकथन पूर्वकं तस्मै नमस्कारमालभन्ते तस्मै प्रणामं करोतीत्यर्थः । अतीतकालत्वादारब्धवानिति वक्तव्ये वर्तमानकाले पदप्रयोगः । अद्यपि नमस्काराराम्भाभिप्रायाच्छिष्य परं परया वा नमस्काराराम्भा विशमात् । शब्दशास्त्रेऽपीदृशएव शब्दप्रयोगो दृश्यते । अथ शब्दानुशासनं । अथेत्ययंशब्दोऽधिकारार्थः प्रयुज्यत इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu



पुष्पिकावाक्यानि –

आचार्य यशोमित्र कृतो स्फुटार्थायामभिधर्मकोशव्याख्यायां धातुनिर्देशोनाम प्रथमं कोशस्थानम् ।

" " इन्द्रियनिर्देशो नाम द्वितीयं कोशस्थानम् ।

" " तृतीयंकोशस्थानम् ।

" " चतुर्थं कोशस्थानम् ।

" " अनुशय निर्देशोनामपञ्चमं कोशस्थानम् ।

" " षष्ठःकोशस्थानम् ।

" " सप्तमं कोशस्थानम् ।

" " अष्टमं कोश स्थानं समाप्तमिति ।

## अभिधर्मकोशव्याख्या

क्रमाङ्कः ५२६८ विषयाङ्कः ९

व्याख्याकारः– यशोमित्रः। नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः १० ॥ आकारः १६½×६½ । ग्रन्थसंख्या ५०६२। पत्रसंख्या १५१। अपूर्णान्त्यखण्डिता।

## अभिधर्मकोशव्याख्या

क्रमाङ्कः ६९१६ विषयाङ्कः १०

व्याख्याकारः– यशोमित्रः। नेपालीयंकागतम् । देवनागरी तथा नेवारी लिपिः ॥ पङ्क्तयः ११ । आकार । १६×६½ ग्रन्थसंख्या १६७१ । पत्रसंख्या

## अभिसमयालङ्कार कारिका

क्रमाङ्कः २३७ विषयाङ्कः ११

ग्रन्थकारः– मैत्रेयनाथः । ताड़पत्राणि तथा नेपालीयं कागतं च । भुजिमो लिपि स्तथा देवनागरी लिपिश्च। पङ्क्तयः ६ । आकारः २१×२½ । ग्रन्थसंख्या २७३ । पत्रसंख्या ८।

CC-0. Nepal Sanskrit Academy, Kathmandu



आदिवाक्यम्—

ॐ नमो मैत्रेयनाथात
या सर्वज्ञतया नयत्युपशमं शांतैषिणः श्रावकान्
या मार्गज्ञतया जगद्धितकृतां लोकार्थसंपादिका
सर्वाकारमिदं वदन्ति मुनयो विश्वं यया सङ्गता-
स्तस्मै श्रावकबोधिसत्व गणिनो बुद्धस्य मात्रे नमः॥

सर्वाकारज्ञतामार्गः शासिता योऽत्र देशितुः।
धीयन्तो वीदि रन्तु मनालीढस्य रैरिति ॥
स्मृतौ चाधाय सूत्रार्थं धर्मचयान्दशार्त्मिकाम्।
सुखेन प्रतिपत्सान्नित्यारम्भ प्रयोजनम् ॥
प्रज्ञापारमिताष्टाभिः पदार्थैः समुदीरिता।
सर्वाकारज्ञता मार्गज्ञता सर्वज्ञता ननु ॥
सर्वाकाराभि संवोधौ मूर्द्धप्राप्तोऽनु पूर्विकः।
एक क्षणोभिसम्बोधो धर्मकाम श्चतुष्टधा ॥
चित्तोत्पादोऽववाधश्च निर्विवोध श्चतुर्विधा।

पुष्पिकावाक्यानि—

अभिसमयालङ्कारे प्रज्ञापारमितोपदेशशास्त्रे सर्वाकारज्ञताधिकारः प्रथमः
अभिसमयालङ्कारे प्रज्ञापारमितोपदेशशास्त्रे मार्गज्ञताऽधिकारो द्वितीयः।
" " सर्वज्ञताऽधिकारस्तृतीयः।
" " सर्वाकाराभिसंवोधिकार श्चतुर्थः।
" " बुद्धाभिसमयाधिकारः पञ्चमः।
" " षष्ठोऽधिकारः।
" " एकक्षणाभिसमयाऽधिकारः सप्तमः।
" " धर्मकामाधिकारोऽष्टमः।

अभिसमयालङ्काररत्ननाम प्रज्ञापारमितोपदेशशास्त्रं समाप्तम्। कृतिरियमाचार्य मैत्रेयनाथस्य।

CC-0. Nepal Sanskrit Academy, Kathmandu



## अभिसमयालङ्कारविवृत्तिः

क्रमाङ्कः २३७ विषयाङ्कः १२

टीकाकारः —आचार्य हरिभद्रः । ताड़पत्राणि । मागधाक्षरः । पङ्क्तयः ८ । आकारः२१½×२½ । ग्रन्थसंख्या १३०० । पत्रसंख्या २६ । जीर्णः शीर्णश्च ।

## अभिसमयालङ्कारव्याख्या सुनिर्मलाख्या

क्रमाङ्कः ५५ विषयाङ्कः १३

टीकाकारः— विमुक्तिसेनः । ताड़पत्राणि । नेवारी लिपिः । पङ्क्तयः ६ । आकारः २२ × २ । ग्रन्थसंख्या ३८०० । पत्रसंख्या १०७ ।

आदिवाक्यम् —

नमोभगवत्यैआर्यप्रज्ञापामितायै

या सर्वज्ञतया नयत्युपसमं शान्त्यैषिणः श्रावकान्
या मार्गज्ञतया जगद्धितकृता लोकार्थसंपादिका ।
सर्वाकारमिदं वदन्ति मुनयो विश्वं यया संगता-
स्तस्यैश्रावक बोधिसत्व गणिनो बुद्धस्य मात्रे नमः ।

कोऽर्थः सर्वार्यपुद्गलक्षाधिकारेणत्रिविध सर्वज्ञता साधारण । गुणोपन्यास पूर्वकमयं प्रज्ञापारमितायै नमः इत्या च क्षीणयुक्त्या अभिसमयालङ्कारोपदेशोपनिबन्धाऽनुष्ठानं कृतं विवृणोतीत्यभिसमयालङ्कारस्यायमुपनिबन्धः प्रतिज्ञायि । किमर्थम् । सर्वाकारज्ञतामार्ग शासिता यत्र देशितुः । श्रीमन्तोवीक्षिधीरस्तु मनोलीढ़ं परैरिति । स्मृतो बोधाय सूत्रार्थं धर्म चर्या दिशात्मिक । सुखेन प्रतिपत्सारं प्रयोजनमिति ।

परमेश्वर परमभट्टारक परमशौगत महाराजाधिराज श्रीमद्रामपालदेव प्रवर्द्धमान कल्याणविजयराज्ये संवत् २ ३ अ (आ) श्विन दिने ५ ।

CC-0. Nepal Sanskrit Academy, Kathmandu



# अभिसमयालङ्कारालोकः
( अष्टसाहस्रिका व्याख्या )

क्रमाङ्कः २१४ विषयाङ्कः १४

ग्रन्थकारः— आचार्य हरिभद्रः। नेपालीयं कागतम् । देवनागरी लिपिः। पङ्क्तयः ११ । आकारः १३×५ । ग्रन्थसंख्या ७३५० । पत्रसंख्या १६७ ।

आदिवाक्यम्—

ॐ नमः सर्वज्ञाय

य सर्वज्ञतया नयत्युपशमं शान्तैषिणः श्रावकान्
या मार्गज्ञतया जगद्धितकृतां लोकार्थ संपादिका ।
सर्वाकारमिदं वदन्ति मुनयो विश्वं यया सङ्गता-
स्तस्मै श्रावक बोधिसत्व गणिनो बुद्धस्य मात्रे नमः ॥

मायारूप समान भाव विदुषां मुक्तिपरां योगिनां
संसारोदरवर्ति दोषनिचये संमूर्च्छितान्देहिनः ।
मैत्रेयेण दयावता भगवता नेतुं स्वयं सर्वथा
प्रज्ञापारमिता नयेस्फुटतराटीका कृता कारिका ॥

भाष्यं तत्त्वविनिश्चये रचितवान् प्रज्ञावतायाग्रणि-
रार्यासङ्ग इति प्रभास्वरयशास्तत्कर्तृ सामर्थ्यतः ।
भावाभाव विभागपक्षनिपुण ज्ञानाभिमानोन्नत-
आचार्यो वसुबन्धुरर्थकथने प्राप्तास्पदः पद्धतौ ॥

योगाभ्यास पदार्थ तत्वमथनाल्लोकोत्तर ज्ञानिनो
जातस्त्वार्य विमुक्तिसेन सुधियो यत्नो महान् वृत्तितः ।
एकान्तोत्थ विपक्षदृष्टि शमने शास्त्राम्बुधौ बुद्धवान्
यो लोके सविमुक्तिसेन वचसा ख्यातोऽपरो वार्तिके ॥

CC-0. Nepal Sanskrit Academy, Kathmandu



वक्तुं तत्र न मद्विधाः क्षतधियाऽपूर्वं कथंचित्समा
संक्षुण्ये हि बुधोत्तमैरहरहः कोऽसौ न वस्तुक्रमः ।
ज्ञानावाहक धर्मतत्त्व विषये जाताभिलाषा वयं
व्याख्यां तेन परां सदर्थ विषयां कर्तुं समभ्युद्यताः ॥

एवमित्यादि सर्वत्रैव ह्यर्थसंशयेन सर्वेषां संबन्धाभिधेयप्रयोजन प्रयोजनावसाय पूर्तिका प्रवृत्तिरिति संबन्धादीनि प्रज्ञापारमितायां वाच्यानि । तथा हि यदि संबन्धाभिधेयमस्यानकथ्यते तदोन्मत्तादि वाक्यवदसंबन्धमनर्थकञ्चेत्याशङ्कया न कश्चित्प्रवर्तेतापिश्रोतुमिति संबन्धाभिधेयमस्यावश्यं वचनीयम् । तथा सत्यपि संबन्धाभिधेये निष्पादितक्रिये कर्मण्यविशेषाभिधायी साधनमित्यादि, ▯ साधनन्यायमतिपततीति न्यायात्सूत्रान्तरासङ्गृहीतविशिष्टप्रवृत्यङ्ग प्रयोजनरहितं प्रज्ञापारमितासूत्ररत्नं श्रद्धानुसारिणोऽपि श्रोतुमपि नाद्रियन्त इत्यादावसाधारणंक्रियाफलंसूत्रेप्रवृत्तिकामनां प्रवृत्तये तद्गतमेव प्रयोजनं वाच्यं नान्यगतमन्यथा ह्यसङ्गताभिधानंस्यात् ।

**पुष्पिकावाक्यानि**

अभिसमयालङ्कारालोकायां प्रज्ञापारमिताव्याख्यायां सर्वाकारज्ञता चर्या परिवर्तोनाम प्रथमः ।

" " शक्रपरिवर्तोनाम द्वितीयः ।

" " स्तूपसत्कारपरिववर्तोनाम तृतीयः ।

" " गुणपरिकीर्तनपरिवर्तोनाम चतुर्थः ।

" " पुण्यपर्यायपरिवर्तोनाम पञ्चमः ।

" " अनुमोदनापरिणामनापरिवर्तो नाम षष्ठः ।

" " निरयपरिवर्तोनाम सप्तमः ।

" " मार्गज्ञताधिकारो द्वितीयः ।

" " सर्वज्ञतापरिच्छेद स्तृतीयः ।

" " स्तुतिपरिवर्तोनाम नवमः ।

CC-0. Nepal Sanskrit Academy, Kathmandu



„ धारणगुण परिकीर्तन परिवर्तोनाम दशमः ।
„ मारपरिवर्तोनामैकादशः ।
„ लोकसंदर्शन परिवर्तोनाम द्वादशः ।
„ अचिन्त्यपरिवर्तोनाम त्रयोदशः ।
„ औपम्यपरिवर्तोनाम चतुर्दशः ।
„ देवपरिवर्तोनाम पञ्चदशः ।
„ तथा परिवर्तोनाम षोड्शः ।
„ अविनिवर्तनीयाकार लिङ्गनिमित्त परिवर्तोनाम सप्तदशः ।
„ शून्यता परिवर्तोनामाष्टादशः ।
„ मारकर्म परिवर्तोनामैकविंशतितमः ।
„ „ शिक्षापरिवर्तोनाम पञ्चविंशतितमः ।
„ „ सारपरिवर्तोनाम सप्तविंशतितमः ।
„ „ अवकीर्णकुसुमपरिवर्तोनामाष्टविंशतितमः।
„ „ मूर्द्धाभिसमयाधिकारः पञ्चमः ।
„ „ अपूर्वाभिसमयाधिकारः षष्ठः ।
„ „ एक क्षणाधिकारः सप्तः ।
„ „ अनुगमपरिवर्तोनामैकोनत्रिंशत्तमः ।
„ „ सदाप्ररुदितपरिवर्तोनाम त्रिंशत्तमः ।
„ „ धर्मोद्गतपरिवर्तोनामैकत्रिंशत्तमः ।
„ „ परिन्दना परिवर्तोनाम द्वात्रिंशत्तमः ।

अभिसमयालङ्कारालोकाऽऽ यष्टसहस्रिका प्रज्ञापारमिताव्यारुया समाप्ता ।
कृतिरियमाचार्य हहिभद्रपादानाम् ।
नेपालराजकीयपुस्तकालयस्थ प्राचीननेवाराक्षर मागधाक्षर संमेल प्रायवा-लिप्या प्रतिपृष्ठं सप्तपङ्क्तिविन्यासेन २८ अङ्गुलायामेषु पादोनत्र्यङ्गुल परिणाहेषु ताड़पत्रेषु लिखितं १६५ पत्रेषु समाप्तं विलुप्तप्रथमशतोत्तर

CC-0. Nepal Sanskrit Academy, Kathmandu



सप्तत्रिंशाष्टत्रिंशपत्रत्रयं प्रायः शुद्धं प्रतीकादिषु गैरिकलेपन दर्शनेनानुमीयमान विद्वदवलोकनं लिपि विन्यासादितः षट्सप्तशतवर्षेभ्यो नार्वाचीनतयागम्यमानं प्राचीन पुस्तकमवलम्ब्य १९८३ वैक्रमाब्दे चैत्रमासे श्रीपञ्चकाञ्चित महाराजाधिराज त्रिभुवनवीर विक्रमसाहदेव विजयराज्ये श्रीत्रयार्चित महाराजा चन्द्रसंशेर-वर्म प्रधानसाचिव्यानुप्राणि ते नेपालदेशान्तर्गत काष्ठमण्डपराजधान्यां राजगुरु विद्वद्वर श्रीहेमराज शर्मणामाज्ञया तदीय भारतीभवनार्थं पूर्णप्रसाद शर्मणा देव-नागराक्षरैः कागतपत्रेषु प्रतिलिपीकृत्य लिखितमिदं पुस्तकमिति शुभम् ।

## अमोघपाशमहायानसूत्रम्

क्रमाङ्कः १८३ विषयाङ्कः १५

ग्रन्थकारः — — — । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ६ । आकरः ८×४ । ग्रन्थसंख्या १६२ । पत्रसंख्या १६ ।

आदिवाक्यम्—

ॐ नमः श्रीमदमोघपाशलोकेश्वराय

एवं मया श्रुतमेकस्मिन्समये भगवान् पोत (र) लके पर्वते विहरतिस्म, आर्यावलोकितेश्वरस्य भगवान् अनेकशालतमालवालचम्पकाशोकातिमुक्तक-नानारत्नवृक्षसमलङ्कृते । महताभिक्षुसंघेन सार्द्धमष्टादशभिर्भिक्षुसहस्रैर्नवनवतिभिश्चबोधिसत्वकोटी नियुतशतसहस्रैरनेकैश्च शुद्धावासकायिकैर्देवपुत्रकोटी नियुतशतसहस्रैः परिवृतः पुरस्कृतईश्वरमहेश्वर ब्रह्मवैतालिकान् देवपुत्रानधिकृत्य धर्मदेशयति ।

अन्तिमं वाक्यम्–

सर्वाशां परिपूरयिष्यति, मनःशिलाञ्जयं वा परिष्य अस्त्री (ची) खाञ्जयित्वा ततोऽन्तर्हितो भवति । आकाशेक्रामति, असंमोहज्ञानव्यूहंनामसमाधिं प्रतिलभते।

CC-0. Nepal Sanskrit Academy, Kathmandu



यदिच्छति तत्करोम्येवसाधका इति । इदमवोद्ध गवानात्तमना आर्यावलोकितेश्वरो वोधिसत्वो महासत्वस्ते च वोधिसत्वास्ते च शुद्धावासकायिकादेवपुत्राः सदेव-मानुषासुरगन्धर्वश्च लोको भगवता भाषितमत्यानन्दन्निति । आर्या अमोघपाश-नाम हृदयं महायानसूत्रं समाप्तम् ।। शुभमस्तुसर्वदा ।।

## अर्थविनिश्चयसूत्रम्

(धर्मपर्यायम्)

क्रमाङ्कः १५८ विषयाङ्कः १६

ग्रन्थकारः — — — । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ५ । आकारः १३×३ । ग्रन्थसंख्या ११२५ । पत्रसंख्या ३७।

आदिवाक्यम्—

### श्रीमञ्जुगुरवेनमः

भगवानाह कश्चासौभिक्षवोऽर्थविनिश्चयो नाम धर्मपर्यायः । यदुक्त पञ्चस्कन्धाः । पञ्चोपादानस्कन्धाः । अष्टादश धातवः । द्वादशायतनानि । द्वादशाङ्गप्रतीत्यसमु-त्पादः । चत्वार्यार्यसत्यानि । द्वाविंशतीन्द्रियाणि । चत्वारो ध्यानानि । चत्वारो ब्रह्मविहाराः । चतस्रः प्रतिसंविदः । चतस्रः समाधि भावना । चत्वारी स्मृत्युप-स्थानानि । चत्वारि सम्यक् प्रहाणानि । चत्वार ऋद्धिपादाः । पञ्चेन्द्रियाणि । पञ्चबलानि । सप्तबोध्यङ्गानि । आर्याष्टाङ्गमार्गः । षोडशाकारानापानानुस्मृतिः । चत्वारि श्रोत आपत्यङ्गानि । दशतथागत बलानि । चत्वारि वैशारद्यानि । चतस्रः प्रतिसंविदः । । अष्टादशावेणिक बुद्ध धर्माः । द्वात्रिंशन्महापुरुषलक्षणानि । अशीत्यनुव्यंजनानि। अयं भिक्षवोऽर्थविनिश्चयस्य धर्मपर्यायस्योद्देशः ।।

अन्तिमवाक्यम्—

इदमवोचत्, भगवानात्तमनास्ते च भिक्षवः साच सर्वावती पर्षत्सदेवमानुषासुर

CC-0. Nepal Sanskrit Academy, Kathmandu



गन्धर्वश्वलोको भगवतो भाषितमभ्यनन्दन्निति ॥ इति अर्थविनिश्चय नाम धर्मपर्यायं समाप्तम् ।

शुभसंवत् १६७१ धर्मराजेन लिखित्वा दिव्यदेव शर्मणे दत्तमिदं पुस्तकम् ॥

## अर्थविनिश्चयसूत्रम्
(धर्मपर्यायम्)

क्रमाङ्कः १५६ विषयाङ्कः १७

ग्रन्थकारः — — — । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ६ । आकारः ६$\frac{२}{३}$×४ ।- ग्रन्थसंख्या १२२५ । पत्रसंख्या ३० ।

## अर्थविनिश्चयसूत्रव्याख्या

क्रमाङ्कः १५६ विषयाङ्कः १८

टीकाकारः— वीर्य श्रीदत्तः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ५ । आकारः १३ × ३ । ग्रन्थसंख्या १३७५ पत्रसंख्या ८६ ।

आदिवाक्यम्

नमः सर्वज्ञाय

कन्दर्पदलनं प्रणिपत्यमूर्ध्ना
शौद्धोदनेः सुरनरार्चित पादपीठम् ।
श्रुत्वा गुरोः सुगतसूत्र स तत्त्व विज्ञात्
सूत्रं तदर्थं समनु स्मरणं करिष्ये ॥

CC-0. Nepal Sanskrit Academy, Kathmandu



सूत्रशरीरं निदानं उपोद्घातः प्रयोजनं, उद्देशो निर्देशोऽनुसन्धिश्च । तत्र निदानं एवं मयेत्यारभ्य यावदर्द्धत्रयोदशभिभिक्षु शतैरिति यावत् ।। उपोद्घातः । अर्थनिर्देशाय प्रस्ताव रचनं, अप्रस्तावं ह्युच्यमानमसुभर्गस्यात्तन्निपेधाय प्रस्ताव रचनम् । स च भगवानित्यारभ्येति । भिक्षवो भगवतः प्रत्यश्रौर्षाः । भगवांस्तानिदमवोचदिति यावत् । प्रयोजनं प्रवृत्यङ्गम् । सूत्रञ्च व्यख्यातु कामेनावश्यमेतद्वक्तव्यम् । श्रोतुरादरेण श्रवणादिषु प्रवर्तनार्थः । अविदित प्रयोजनाः प्रेक्षावन्तो न क्वचित्प्रवर्तन्ते ।

तथाचाह———

श्रुत्वा सूत्रस्य माहात्म्यं श्रोतुरादरकारिता ।
श्रवणाद्ग्रहणे स्यातामादौ वाच्यं प्रयोजनमिति ।।

तदर्थस्यार्थविनिश्चयसूत्रस्य धर्म प्रविचयार्थमुपदेशः । नहि विना सूत्रोपदेशेन शिष्यः शक्तो धर्मान् प्रविचेतुम् । धर्मप्रविचयोऽपि क्लेशोपशमनार्थम् । तदुपशमोऽपिनैष्ठिकपदावाप्तये भवतीत्यवशेषं प्रयोजनं चात्रैव सूत्रे । निर्दिष्टं यदुक्तार्थविनिश्चय इति । अर्थानां विनिश्चयो धर्माणां प्रविचय इत्यर्थः ।। धर्म प्रविचयः प्रयोजनमित्युक्तं भवति ।

अन्तिमंवाख्यम्—

आसीत्स सौगतो नाथः प्रजायाः पृथु विक्रमः ।
धर्मपाल इतिख्याते राज्ये तस्य महोदये ।।
श्रीनालन्दाविहारेऽस्मिन्भूतो भिक्षु जिनेन्प्रियः।
वीर्य श्रीदत्तनामेदं कृतं तेन विबन्धनम् ।।
त्रयोदशशतान्यस्यश्लोकाश्च पञ्चसप्ततिः ।
इति प्रमाणं ग्रन्थस्य विदितं च परिस्फुटम् ।।
अर्थविनिश्चय सूत्रस्य निबन्धनं परिसमाप्तम् ।
शुभंभूयात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu



संवत् १६७१ आश्विनकृष्णस्य द्वितीयायां आदित्यवासरे चक्रमहाविहारस्थ वज्राचार्य धर्मराजेन लिखित्वा विव्यदेव शर्मणे दत्तयिदं पुस्तकम् ॥

## अवयविनिराकरणम्

क्रमाङ्कः २५७ विषयाङ्कः १६

ग्रन्थकारः — — — । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ७ । आकारः १३×४१/२ । ग्रन्थसंख्या १५० । पत्रसंख्या१० ।

आदिवाक्यम्—

ॐ नमः समन्तभद्राय

अभ्यासातिशयस्तथा न विहित स्तादृक् श्रुतं नार्जितम् ।
तन्मे चापलमर्थलेशमधुना निर्मातुमीहे यदि ॥
एतत्सर्वमवेक्षणान्निगदितं तत्पण्डितैर्दृश्यताम् ॥

प्रीणान्त्येव वि — — — हि शिशोप्रायः पितृणामन — — — यो विरुद्धधर्माध्यासवान् नासावेकः । यथा घटादिरर्थः ॥ विरुद्धधर्माध्यासवांश्च स्थूलोनीलादिरर्थ इति व्यापक विरुद्धोपलब्धिः । इह दृश्यमानः स्थूलोनीलादिरर्थो धर्म स चानुभवावसितोऽसतिबाधके प्रत्यक्षसिद्धो हेतोराश्रयसिद्धिं निहन्ति । ननु भवद्भिरसन्नेवावयवी प्रतिज्ञायते स कथं प्रत्यक्षसिद्धः । नावयविनमिह धर्मिणं प्रतिपन्नास्मः किन्तु प्रतिभासमानस्थूलनीलादिकमर्थम् । न तर्हि विरुद्ध धर्मासंसर्गादवयविनं एकत्वं निषिद्धंस्यात् । यद्येव कस्तर्हि भवतामवयवी एकोऽनेकावयवसमवेतार्थ इति चेत् । स किं प्रतिभाससमानत्स्थूलनीलादेवान्योऽनयो वा ।

अन्तिमं वाक्यम्—

तेनेऽयं व्यापकविरुद्धोपलब्धि भूमिका । एवं प्रसाधितेरयास्त्रै रूपासिद्धविरुद्धानैकान्तिकादोषाणामवकाशं लभत इति । एवं मया वहुषु दुर्मतिनिर्मितेषु प्रत्युद्धृतेषु

CC-0. Nepal Sanskrit Academy, Kathmandu



रवत्ययविदूषणकण्टकेषु। आचार्यनीति पथ एव विशोधितोऽयमुत्सार्य मत्सरमनेन जनः प्रका — — तु। समाप्तमिदमवयविनिराकरणमिति।

## अवयविप्रतिषेधसाधनम्

क्रमाङ्कः २६१ विषयाङ्कः २०

ग्रन्थकारः — — —। नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयोऽनियताः। आकारः १३ × ३। ग्रन्थसंख्या ६ पत्रसंख्या १।

नमो मञ्जुघोषाय

आदिवाक्यम्—

वागीशचरणाम्भोजप्रणिपातपुरः सरम्।
उच्यतेऽवयविद्रव्यप्रतिषेधाय साधनम्॥

यो विरुद्धधर्माध्यासवान्नासावेकः। यथा चित्रकम्वलादिः। विरुद्धधर्माध्यासवांश्च घटादिरिष्टएकत्वेनाभिमत इति व्यापकानुपलब्धिः। नायमसिद्धो हेतुः। प्रत्यक्षत एव रागारागकम्पाकम्पावरणलक्षणविरुद्धधर्माध्यासस्य साध्यधर्मिणि सिद्धत्वात्। ननु यद्यवयवानानेकत्वेन विवक्षितान् धर्मित्त्वेनोपायैकत्वाभवात्त्वसाध्यते, सिद्धं साध्यते, तेषामनेकत्वेन सिद्धत्वात्। एकत्वोनाभिमतत्व श्चधर्मिविशेषणमसिद्धम्। तदारब्धस्यावयविन — — — — —।
एतावन्मात्रम्॥

## अष्टसाहस्रिका

क्रमाङ्कः १६४ विषयाङ्कः २१

ग्रन्थकारः — — —। नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ७। आकारः १८×५½। ग्रन्थसंख्या ८००० । पत्रसंख्या २८३ ।पूर्णा

CC-0. Nepal Sanskrit Academy, Kathmandu



स्वस्ति श्रीगिरिराजचक्रचूडामणिर्नरनारायणेत्यादिविविधविरुदावलीविराजमान मानोन्नतमहीमण्डलनेपालेश्वरनरपतिसहस्रसंसेव्यमानचरणकमलो विविधेन्द्रनील-मणीहेमपद्मरागवज्रवैडुर्य्यमुक्तारत्नसमूहसमीकृतयत्नाधिपविभवो विद्याधरसहस्रगी-यमानकीर्तिः सर्वाङ्गसुन्दरः श्रीमहाराजाधिराजः श्री५सुरेन्द्रविक्रमसाह समरजङ् महासमरविजयी विजयराज्ये ।। ।।

देयोधर्मोऽयं प्रवरमहायानयायि ।। परम धार्मिक धर्मात्म शाक्यभिक्षु भाजु-बीरप्रमुखादिसगणानां, यदत्रपुण्यं तद्भवत्वाचार्योपाध्याय मातापितृपूर्वजेभ्य इति कृत्वा सकलसत्वराशयोऽ नुत्तर ज्ञानफलं प्राप्तुवन्तु ।। ।।

भाषा शुभसंवत् ९७२मिति माघ मासे शुक्लपक्षे दशम्यां तिथौ कृत्तिका पररोहिमी-नक्षत्रेशनिश्चरवासरे ।

## अष्टसाहस्रिकाप्रज्ञापारमिता

क्रमाङ्कः १८१ विषयाङ्कः २२

ग्रन्थकारः — — — । ताडपत्राणि । भुजिमो लिपिः । पङ्क्तयः ६ । आकारः १२×२ । ग्रन्थसंख्या । पत्रसंख्या ३७१ । मध्यखण्डिता ।

**आदिवाक्यम्**

ॐ नमो भगवत्यै आर्यप्रज्ञापारमितायै

निर्विकल्पे नमस्तुभ्यम्प्रज्ञापारमितेऽमिते ।
या त्वं सर्वानवद्याङ्गि निरवद्यैर्निरीक्षसे ।।
आकाशमिव निर्लेपां निष्प्रपञ्चां निरक्षराम् ।
यस्त्वां पश्यति भावेन स पश्यति तथागतम् ।।
तव चार्ये गुणाढ्याया बुद्धस्य च जगद्गुरोः ।
नपश्यन्त्यन्तरं सन्त श्चन्द्रचन्द्रिकयोरिव ।।
कृपात्मकाः प्रपद्य त्वां बुद्ध धर्मपुरः सराम् ।
सुखेनायान्ति माहात्म्यमतुलं भक्तवत्सले ।।

CC-0. Nepal Sanskrit Academy, Kathmandu



सकृदप्याशये शुद्धे यस्त्वां विधिवदीक्षते ।
तेनापि नियतं सिद्धिः प्राप्यतेऽमोघ दर्शने ॥
सर्वेषामपि वीराणां परार्थेऽभिरतात्मनाम् ।
पोषिका जनयित्री च माता त्वमसि वत्सला ॥
येबुद्धा लोकगुरवः पुत्रास्तव कृपालवः ।
तेन त्वमसि कल्याणि सर्वसत्वपितामही ॥
सर्वपारमिताभिस्त्वं निर्मलाभिरनिन्दिते ।
चन्द्रलेखेव ताराभिरनुयातासि सर्वदा ॥
विनयं ज्ञानमासाद्य तत्र तत्र तथागतैः ।
बहुरूपा त्वमेवैका नानानामभिरीड्यसे ॥
प्रभां प्राप्येव दीप्तांशोरवश्यायोदविन्दवः।

पुष्पिकावाक्यानि—

आर्याष्टसहस्रिकायां प्रज्ञापारमितायां सर्वाकारज्ञताचर्यापरिवर्तोनाम प्रथमः ।
,, शक्रपरिवर्तोनाम द्वितीयः ।
,, अप्रमेयगुणाधारणपारमितास्तूपसत्कारपरिवर्तस्तृतीयः ।
,, गुणपरिकीर्तनपरिपर्तोनाम चतुर्थः ।
,, पुण्यपर्याय परिवर्तोनाम पञ्चमः ।
,, अनुमोदनापरिणामनापरिवर्तः षष्ठः ।
,, निरयपरिवर्तः सप्तमः ।
,, विशुद्धि परिवर्तोनामाष्टमः ।
,, स्तुतिपरिवर्तोनाम नवमः ।
,, धारणगुणपरिकीर्तनपरिवर्तोनाम दशमः ।
,, मारकर्मपरिवर्तोनामैकादशः ।
,, देवपरिवर्तोनाम पञ्चदशः ।
,, तथतापरिवर्तः षोडषः ।

CC-0. Nepal Sanskrit Academy, Kathmandu



,, अविनिवर्तनीयाकारलिङ्ग निमित्तपरिवर्तोनाम सप्तदशः।
,, शून्यतापरिवर्तोऽष्टादशः।
,, गङ्गदेवभगिनीपरिवर्तोनामैकोनविंशतितमः।
,, उपायकौशल्यमीमांसापरिवर्तोनाम विंशतितमः।
,, मारकर्म परिवर्तोनामैकविंशतितमः।
,, कल्याणमित्रपरिवर्तोनाम द्वाविंशतितमः।
,, शक्रपरिवर्तोनाम त्रयोविंशतितमः।
,, अभिमानपरिवर्तोनाम चतुर्विंशतितमः।
,, शिक्षापरिवर्तोनाम पञ्चविंशनितनः।
,, मायोपमपरिवर्तोनाम षड्विंशतितमः।
,, मारपरिवर्तोनाम सप्तविंशतितमः।
,, अवकीर्णकुसुमपरिवर्तोनामाष्टाविंशतितमः।
,, अनुगमपरिवर्तोनामैकोनत्रिंशत्तमः।
,, सदाप्ररुदितपरिवर्तोनाम त्रिंशत्तमः।
,, धर्मोद्गतपरिवर्तोनामैकत्रिंशत्तमः।
,, परिन्दनापरिवर्तोनाम द्वात्रिंशत्तमः।

राज्ञः श्रीमदरिमल्लदेवस्य विजयराज्ये।

संवत् ३२१ कार्तिकशुक्ल दशम्याम्। शनिश्चरवारे, पूर्वभाद्रनक्षत्रे।

## अष्टसाहस्रिका प्रज्ञापारमिता

क्रमाङ्कः ७६ — विषयाङ्कः २२

ग्रन्थकारः — — —। ताडपत्रात्मा। नेवारी लिपिः। पङ्क्तयः ६। आकारः २१½×२। ग्रन्थसंख्या ८०००। पत्रसंख्या १६५। पूर्णप्राया।

CC-0. Nepal Sanskrit Academy, Kathmandu



स्वस्ति । सम्वत्सरशते याते त्रयसप्तति संयुते ।
पौषे शुक्ल दिने षष्ठे रेवती बुध संयुते ॥
दीप्ते श्रीबलदेवराजविजये लक्ष्मीप्रभामण्डले ।
श्रीमत्पश्चिमवाहनवरे यो हेमकारोऽवसत् ॥
श्रीदामोदरसिंह इत्यभिहितः श्रद्धागुणालङ्कृतः ।
प्रज्ञापारमिता जिनेन्द्रजननी ततः प्रतिष्ठापिता ॥
संसाराद्बहुदोषजालगहनादुध्दृत्य दुःखार्णवान् ।
सद्धर्म्मामृतधारया परमया सेक्तुं समग्रंजनम् ॥
नेतुं चाशु महामुनीशपदवीं संबोधिलक्ष्मीमयीं ।
सर्व्वाकारगुणामिताभवहुलां ज्ञानध्वजैरुच्छ्रितां ॥
वैडूर्याभमवीरसेनरजतप्रख्ये च नाडीदले ।
श्रीबुद्धत्वंविधायिनीमभ्भवतीमार्याष्टसाहस्रिकाम् ॥
विस्पष्टाक्षरमालिनीं सुरुचिरां संलिख्य पुण्यं चितम् ।
प्रज्ञापारमितो जिनो भवहर स्तेन प्रभूयाज्जनः ॥
बुद्धपादाब्जसंसेवी स्यामहं च भवेभवे ।
सर्वसौख्यकरो लोके मैत्रकारुण्यनिर्भर इति ॥

## अष्टसाहस्रिका प्रज्ञापारमिता

क्रमाङ्कः १६५ विषयाङ्कः २३

ग्रन्थकारः — — — । ताडपत्राणि । नेवारी लिपिः । पङ्क्तयः ५ ।
आकारः २२×२ । ग्रन्थसंख्या ८००० । पत्रसंख्या २६० ।
एकपञ्चसमायुक्ते संवत्सरशतद्वये । पौषमास प्रचरेऽतीतसप्तिथौ ।
पुष्यनक्षत्रतारकायुक्तबृहस्पतौ प्रीतिमङ्गले ।
राज्येश्रीइन्द्रदेवस्य भूपतेः कीर्तिमण्डले ।
ख्यातो युगाधरसिंहस्य श्रीयुगलगगोत्तमे ।

CC-0. Nepal Sanskrit Academy, Kathmandu



श्रद्धाभक्ति समायुक्तो बुद्धोपासकवत्सलः ।
तेनेयं सुविलिखिता परमशुभाकाङ्क्षणा ।

## अष्टसाहस्रिका प्रज्ञापारमिता

क्रमाङ्कः २१० विषयाङ्कः २४

ग्रन्थकारः— — — । ताड़पत्राणि । रञ्जनाक्षरः । पङ्क्तयः ६ । आकारः २२×२ । ग्रन्थसंख्या ७५६ । पत्रसंख्या १९६ ।

आ चू २ (२७२) वैशाख शुक्लपौर्णमास्या आदित्यदिने । श्रीपरमेश्वरपरमभट्टारक महाराजाधिरोजपरमशैवआनन्ददेव प्रवर्द्धमानविजयराज्ये लिखितमिति ।

## अष्टसाहस्रिका प्रज्ञापारमिता

क्रमाङ्कः १९६ विषयाङ्कः २५

ग्रन्थकारः — — — । ताड़पत्राणि । रञ्जनाक्षरः । पङ्क्तयः ५ । आकारः १७×२ । ग्रन्थसंख्या ८००० । पत्रसंख्या ३५० ।

## अष्टसाहस्रिका प्रज्ञापारमिता

क्रमाङ्कः २०० विषयाङ्कः २६

ग्रन्थकारः— — — । ताडपत्राणि । भुजबलाक्षराणि । पङ्क्तयः ६ । आकारः १२×१ । ग्रन्थसंख्या ८५०० । पत्रसंख्या ३९९ ।

## करुणा पुण्डरीकम्

क्रमाङ्कः १०१ यिषयाङ्कः २७

ग्रन्थकारः— — — । नेपालीयं कागतम् । नेवारी लिपि : । पङ्क्तयः ६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu



आकारः १३×३ । ग्रन्थसंख्या २२४६। पत्रसंख्या १६२ ।

आदिवाक्यम्—

ॐनमः श्रीसर्वबुद्धबोधिसत्वेभ्यः
बुद्धं प्रणम्य सर्वज्ञं धर्म्मसंघं गुणाकरं
करुणापुण्डरीकाख्यं प्रवक्ष्ये बोधिसूत्रकम् ॥

एवं मया श्रुतमेकस्मिन् समये भगवान् राजगृहे विहरतिस्म । गृद्धकूटे पर्व्वते महताभिक्षुसंघेन सार्द्धं द्वादशभिक्षुशतैः सर्व्वैरर्हद्भिः क्षीणाश्रवैर्निः क्लेशैर्वशीभूतैः सुविमुक्तचित्तैः सुविमुक्तप्रज्ञैः राजन्यैः महानागैः कृतकृत्यैः ॥ कृतकरणीयैरपहृतहारैरनुप्राप्तस्वकार्यैः परिक्षीणभव संयोजनैः। सम्यगाज्ञासुविमुक्तचित्तैः सर्व्वचेतो वशि परमपारमिताप्राप्तैरभिज्ञातै महाश्रावकैः ॥

पुष्पिकावाक्यानि–

करुणापुण्डरीकेमहायानसूत्रे धर्म्मचक्र प्रवर्त्तनो नाम प्रथमः परिवर्त्तः ।
करुणापुण्डरीके महायानसूत्रे द्वितीयो धारणी मुख परिवर्त्तः ।
करुणापुण्डरीके दानविसर्गस्तृतीयः ।
करुणापुण्डरीके महायानसूत्रे बोधिसत्वव्याकरण परिवर्त्तश्चतुर्थः ।
इति करुणापुण्डरीके महायानसूत्रे दानपरिवर्त्तोनाम पंचमः ।
इति श्रीकरुणापुण्डरीकं नाम महायानसूत्रं समाप्तम् ।
श्रेयोस्तु सम्वत् ८६७ मिति पौषकृष्णैकादश्यां तिथौ व्यतिपातयोगे भौमवारे थ्वधुन्हुस संपूर्ण्णयाना दीनजुलो ॥ ॥ यदि शुद्धम्वा अशुद्धम्वा मम दोषो न दीयताम् लेखकस्य दोषो नास्ति शोधनीयं महद्बुधै ॥ नेपालदेशे शंखरापुर महानगरे मणिचूड़पर्व्वते श्रीउग्रतारा वज्रयोगिनीस्थाने सकदुत्तवाहारया ननीक्षेया वज्राचार्य्य अमृतमुनिना लिखितम् ॥ ततः परं पुत्रपौत्रादिनाम अध्ययनार्थे ॥ शुभमस्तु सर्वकालं लक्ष्मीवृद्धिरस्तु । थ्व सफुलि सुनानं ग्वह्मनं लोभयातसा पंचमहापातक लायुश्रो निदानयातसा असुमेध फल प्राप्तिजुयु । शुभं भूयात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu



# कर्मविभङ्गसूत्रम्

क्रमाङ्कः १४१ विषयाङ्कः २८

ग्रन्थकारः — —। ताडपत्राणि। नेवारी लिपिः। पङ्क्तयः । आकारः। ११×२। ग्रन्थसंख्या । पत्रसंख्या ४। अपूर्णम्।

# कर्मविङ्ग:

क्रमाङ्कः २६३ विषयाङ्कः २९

ग्रन्थकारः । मध्येदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः । आकारः । ग्रन्थसंख्या । पत्रसंख्या । अपूर्ण।

# कश्चनवौद्धाध्यात्मग्रन्थः

क्रमाङ्कः २५९ विपयाङ्कः ३०

ग्रन्थकारः — — —। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः आकारः ८×६½। ग्रन्थसंख्या २०४। पत्रसंख्या २४। खण्डितः।

अन्त वाक्यम्–

तदौर्जित्य प्राप्तानि चान्त्यग्रधर्मावस्थाया। बलानि च भवतः। तत्प्रधाना अग्रधर्मा निवेश्रभागीयं स्यात्। वज्रोपम चित्तोत्पाद आशय स्तथा सन्नाहेन प्रतिपत्तिः ताभ्यामग्रधर्माः। आर्याणान्तु लोकोत्तरत्वेन। प्रज्ञया क्लेशक्षेदनं प्रत्यन्तरयितु तिरस्कर्त्तुमशक्यत्वात्। आनन्तर्य समाधिः स्रोतो मार्गस्तदा पदानात्। स्रोत आपन्नो यानत्रये स्रोत अयत्तेरनुशयत्सनादनु संसाङ्गो बोधिसत्वः प्रज्ञप्तिमत्पुरुषाधिष्ठानः। अल्पात्मकत्वादार्यः श्रमग्राहको बोधिसत्वस्थ चित्त्योपाया विस्मरणाद्यानत्रय भावना बोधिसत्व महात्म्य बुद्धमहात्म्याभिलाष त्रयच्छन्द श्चिरमपि निर्वाणमासाद्यात्कुर्वन्, संवत्सर्वत्र ददन्कारुण्याद्दानपारमिता परिपूरे

CC-0. Nepal Sanskrit Academy, Kathmandu



मुदितां भूमिमासादयति न फलयतः । पहुया विअफल लम्भउ ओजोर्थ विय हि उहोइसोपा वइणि अभिमिलहु जहिं आआथन कोवि स च ।

प्रोढामेवाभिरूढः सन् योढामेवासि विस्मृतः ।
स्वभावाद्यदि भावानां सद्भावमनु पश्यसि ॥
अहेतु प्रत्ययान्भावा समेवंसति पश्यसि इत्युक्तः ।

अन्तिमं वाक्यम्–

एकत्वं जगतस्तन्वं वित्तिमाव्यवस्थितम् ।
परेण वेदनं यस्य न सविद्येत एव हि यत् ॥
इति तत्त्व परिज्ञान समस्तप ( द ) वर्जितम् ।
परा वोधि स्वरूपे — तदन्यस्त्व समासतः ॥

फलं प्रधानं प्रशमोमलानां पदश्च तस्योदमलं प्रसिद्धम् ।
तदत्रयोग स्त्रिभवोत्तमानां चिराययुक्तः करूणान्वितानाम् ॥
मध्यम पञ्चविंशतिक ।

णिक्खणु लाक्ख करे विमणेलहुया वहिणि अचित्ते ।
तेविद्धे एहु स अलुभउ विउट्ठोइनि रूत्त— — — ।
इतो नास्ति ।

## कस्यचित्प्रौढ ग्रन्थस्य द्वितीयपत्रम्

क्रमाङ्कः ३१० विषयाङ्कः ३०

ग्रन्थकारः — — — । ताडपत्रम् । मागधि लिपिः । पङ्क्तयः ७ । आकारः १०×२ । ग्रन्थसंख्या २७ । पत्रसंख्या १ । अपूर्णम् ।

अर्थानुपजात विशेषा एवोपलभ्यन्ते तथाप्य निवृत्तो व्याघातः । प्रधातं पुरुषार्थं प्रवर्चत इति । सोऽयं प्रधानवादो यावद्याव द्विचार्यते तावत्तावत् प्रमाणा वृत्तं

CC-0. Nepal Sanskrit Academy, Kathmandu



वाधत इति । येपि परमाणु न पूर्व्वकर्म्माधिष्ठिता जगतः कारणत्वेन वर्णयन्ति तानप्रतीदमुच्ययें । परमाणवः प्रवर्त्तन्त इति सततं प्रवृत्या भवितव्यं । अथ काल विशेषापेक्षाः प्रवर्त्तन्तन्ते । परमाणुभिः कालो व्याख्यातः । यथा अचेतनत्वात्परमाणवोऽचेतनाः प्रवर्त्तन्त इति । नयुक्त माध्यम मत्वात् । वुद्धिमन्तं कारणी धिष्ठातारमपेक्ष्यन्ते तथा कालो पीति । न हि तत्रा चेतनत्वं निवर्त्तत इति क्षीरादि विदचेतनस्यापि प्रवृत्ति रितिचेत् । यथा अपत्य भरणार्थं क्षीरादेरचेतनस्य प्रवृत्तिरेवंपरमाणवोऽचेतनाः प्रवर्त्तन्त इति । न युक्त साध्य ममत्वात् । यथैव परमाणवः स्व तन्त्राः प्रवर्त्तन्त इति साध्यं तथा क्षीराद्यचेतनं स्वतन्त्रं प्रवर्त्तन्त इति । यदि च स्वतन्त्रं क्षीरादि प्रवर्तते मृतेशुपि वर्त्तेत् । मृते तेन प्रवर्त्तते । अतोगम्यते वुद्धिमत्कारणा धिष्टितं तदपि । नचायं हेतु स्तस्मान्निवर्तते । एवं यावद्यावदचेतनं प्रवर्त्तते सर्व्वं तद्बुद्धिमत्कारणा धिष्ठितमिति । अयमपरोहेतुः । वुद्धिमत्कारणा धिष्ठितं महाभूतादि व्यक्तं सुख दुःख निमित्तं भवति । रूपादि मत्वात्तु र्यादिवत् । धर्म्मा धर्म्मौ वुद्धिमत्कारणाधिष्ठितौ पुरुषस्योपभोगं कुरुतः । करणत्वाद्वाध्यादिवत् । आत्मैवावष्ठित धर्म्मा धर्म्मयो भविष्यतीति । यस्य तौ धर्म्मा धर्म्मौ सएवाधिष्ठितो भविष्यतीति । न युक्तं प्राकायकरणोत्यत्ते स्तदसंवोधात् । यावत्कायकरण संहातोनोपजायते पुरुषस्य तावदयमज्ञ उपलभ्शानपि तात्रूपादीनवियान्षोपलभते । कुतोऽनुपलभ्यो धर्म्मा धर्म्मा वुपलप्स्यत इति । यदि च पुरुषः स्वतन्त्रः प्रवर्त्तते ं न दुःखं कुर्यात् । न हि कश्चिदात्मनो दुःखमिच्चतीति । यश्चात्मनोऽङ्गोपघात शिरः च्छेदा दिवाकरोति सोपि तद्वैकल्पे प्रायेणवहि त वुद्धिः प्रवर्त्तत इति । यदि पुनर्द्धर्म्माः स्वाधिष्ठिताः प्रवर्तेरन् । तन्तयुक्तमचेतनत्वात् । न हि किञ्चिदचेतनं स्वतन्त्रमधिष्ठापकं दृष्टमिति अभ्यपघम्यापि च धर्म्मा धर्म्मयो परमाणुषु प्रवृत्ति सामर्थ्यं ॥ न करणस्य केवलस्य क्रिया निर्वृत्ति सामर्थ्यं । न हि केवलं करणं क्रियानिवृति यदुपलभत इति । अथ परमाणवपेक्षाभ्यां धर्म्मा धर्म्माभ्यां क्रियाजन्येत् । तदयुक्तमदृष्ट सेत । न हि धर्म्मकरणाभ्यां क्रियां कचिदपियन्यमानां पश्याम इति । आत्माकर्त्ता भविष्यतीति । उक्तमत्राज्ञत्वादिति । प्रकारणैवोत्पत्ति र्भविष्यतीति न युक्तमदृष्टत्वादिति । न चान्यागतिरस्ति । तस्माद्वुद्धिमत्कारणा

CC-0. Nepal Sanskrit Academy, Kathmandu



धिष्ठिताः परमाणवः कर्म्माणि च प्रवर्त्तन्त इति । क्रियानादेशादकारणमिति चेत् । अथ मन्यसेयेखलुकर्ता — — — । एतावन्मात्रम् ।

## कस्यचित्प्रौढग्रन्थस्य व्याख्यापत्रम्

क्रमाङ्कः ३१०　　　　　　　　　　यिषयाङ्कः ३१

ग्रन्थकारः — — । ताड़पत्रम् । मागधी लिपिः । पङ्क्तयः ८ । आकारः १०×२ । ग्रन्थसंख्या ३६ । पत्रसंख्या १ । अपूर्णम् ।

पगच्छतानेकं चित्रमिति हेयमेकचित्रसमुच्चयो ह्यनेकानिति । अथानेकमचित्र मित्युच्यत इति । एवमप्य निवृत्तो व्याघात इति । अचित्रं चित्रमिति । यथा अशुक्लं शुक्लमिति । अथा चित्राणि त-रूपाणि संहत्यपटे चित्रमुत्पादयन्तीति । पद्म आश्रीयते । एवश्च न किञ्चि द्वाध्यते । पटान्तरे प्रसङ्गः चित्रप्रत्ययस्य यस्ययपदस्यैकं चित्रंपार्श्वं द्वितीय मचित्रं । तेन यथैकस्मिनपार्श्वे पटंपश्यतः चित्रपट वुद्धिर्भवति । एवं पटान्तरे चित्रपटवद्वा । भवितव्यमिति । भवतैवेदमुक्तं । यस्यपटस्यैकंपार्श्वं चित्रं तत्रपटो न चित्रः । पार्व्वस्यापटत्वात् । चित्रप्रत्ययस्तत्र कस्मान्नेति चेत् । चित्रा चित्राभ्यां पार्श्वाभ्यांपट आरभ्यमाणः स्त्र— पार्श्वान्तरे चित्रप्रत्ययः प्रशक्तः । न प्रशक्त एकस्य चित्ररूपस्यातारम्भकत्वात् । एकस्मिन-पार्श्वे चित्ररूपं तत्कथमवय विनिरूपान्तरलप्स्यते । एता वन्तुशक्यं वक्तु मवयवरू-पाभ्यामवयवि निरूपान्तरमारभ्यते । उपलव्धेरिति । यद्ययनरूपो अवयवीस्यान्तो पलभ्येत । न चावयरूपादवयविनोग्रहणं युक्तं । वायावप्युपलब्धि प्रसङ्गात् । यद्यन्यस्यरूपादन्यस्योपलब्धिर्भवति । वायुरत्युपलभ्यः प्राप्नोति । न चैतदस्ति । तस्मात्स्वरूपादवयव्युपलभ्यते । उभयावयवरूप प्रतिसन्धानाद्वा अवयवि निरूपो-पलब्धिर्भवतीति । न चैवं सत्यरूपो अवयवीति । तस्मादयं चाभिमानः प्रतिसिध्यते परिष्काररूपो । नावयवी । यथारूपा दिषु मिथ्या सङ्कल्पोनरूपादय इति । अयंग्रन्थो-मुनिना श्लोकेन प्रदर्शितः । इन्द्रियान्वाह्य नखाय यदिस्यु व विकल्प सर्व्वोनिर्थेन-युज्यतेचरन्तीन्द्रियगोचर इति ॥ सर्व्वाग्रहणमवयव्यसिद्धिरिति । प्रत्यवस्थितो अथे-

CC-0. Nepal Sanskrit Academy, Kathmandu



दमाह ।। केश समूहे तैमिरिकोपलब्धिवत्तदुपलब्धिः ।। यथैकः केशस्तैमिरिकेशनो — केश समूहस्तूप लभ्यते । तथैकःकेशो अणुन्नोपलभ्यते समूहस्तूपलप्स्यत इति तदिद मणुसमूहविषयम ग्रहणमिति ।। विषयानतिक्रमेण इन्द्रियस्य पटुमन्द भावा-द्ग्रहणस्य तथा भावोना विषये प्रवृत्तिः ।। न हीन्द्रियं प्रकृष्यमाणं स्वविषयमति क्रामति । न हि चक्षुः प्रकृष्यमाणंरसंग्रृन्हाति । नापि नीकृष्यमाणं स्वविषयात् प्रच्यवते । अपि तु स्वविषय एवेन्द्रियस्य प्रकर्षापकर्षापेक्षाणिपट नन्दभावेन ग्रह-नि भवन्तेति । तत्र पट ग्रहणं सामान्यविशेष तद्वतां ग्रहणमिति । मन्दे तु सामा-न्यमात्र पर्यालोचनमिति । सोयं तैमिरिकः कश्चिच्चक्षुर्विषर्यकेशं न ग्रृन्हाति कश्चिच्चग्रृन्हाति केशसमूहं — ह्यतैमिरिकस्य चक्षुषौ विषय इति । परमाणव स्त्वतीन्द्रियादर्श विषयत्वं न प्रतिपद्य ते । असंहता अतीन्द्रियाः सहता श्चैन्द्रि-यका इति । अतिमहान्व्याघातः । अनुपजात विशेषाणा दर्शन विपयात्वानुपपत्ते-रिति । तस्मादुपलभ्यते । अवयवी दर्शनस्य विषय इति । संचयमात्रं इति चेत् । अथ मन्यसे दर्शनस्य परमाणु संचयो विषयः सञ्चिता परमाणवोदर्शनस्य विषय-तामुपयान्तीति । न सञ्चयस्य संयोगभावात् । सञ्चयो निरूप्यमाणः परमाणु संयोगः संयोगश्चोपलभ्यमानाश्रय उपलभ्यते । भवति हीदमनेनर्संयुक्तमिति । यश्च विषय उपलभ्यते तस्यानुपलब्धा वावरणादि कारणमुपलभ्यते । न तु परमाणव उपलब्धिलक्षणप्राप्ताः । तस्मान्नतेषामावरणादिरग्रहण कारणमिति । अवयवा अव-यवि प्रसङ्ग श्चैवमाप्र — — — त ।। यश्वा — — वयवेषुवृत्ति विकल्पाद-भाव उक्तः । सो अवयवस्यावयवेषु प्रसह्यामानो निरवयवाद्वा परमाणुतोनि वर्त्तते । आश्रयाद्वा । नवानिवर्त्तेत । कथमिति । अवयव्यवयवेषु वर्त्तमानः प्रत्येकं सर्व्वा — — — । एतावन्मात्रम् ।

## कारण्डव्यूहः ( महायानसूत्ररत्नराजः )

विषयाङ्कः ३२

क्रमाङ्कः २६०

ग्रन्थकारः— — — । नेपालीयं कागजम् । नेवारी लिपि : । पङ्क्तयः ५ ।

CC-0. Nepal Sanskrit Academy, Kathmandu



आकारः १०×१। ग्रन्थसंख्या १४१०। पत्रसंख्या १०८। अपूम्।

आदिवाक्यम् —

ॐ नमः श्रीआर्य्यावलोकितेश्वराय ॥ बोधिसत्वाय महासत्वाय महाकारुणिकाय ॥ एवं मया श्रुतमेकस्मिन्समये भगवान् श्रावस्त्यां विहरतिस्म ॥ जेतवने अनाथपिण्ड़स्यारामे महता भिक्षुसंघेन सार्द्धमर्द्धत्रयोदशभिर्भिक्षुः शतैः। संवहुलैश्च वोधिसत्वैर्म्महासत्वैः

अन्तिमं वाक्यम्—

इदमवोचत् भगवांनात्मना ते च भिक्षव स्ते च वोधिसत्वाः सा च सर्वावती पर्षत्सदेवमानुषासुरगरुड गन्धर्वलोको भगवतो भाषितमभ्यनन्दन्निति ॥ ॥ आर्य्यकारण्ड़व्यूह महायानसूत्रं रत्नराजं समाप्त।

येधर्म्मा हेतु प्रभवा हेतु तेषां तथागतः।
ह्यवदत् तेषाञ्च यो निरोध एवंवादी महाश्रमणः ॥

देयंधर्म्मोयं प्रवर महायानीय परमोपासक तस्य धर्म्मात्मा शाक्यभिक्षु श्रीप्रभाकरस्य यदत्रपुण्य भवताचार्य मातापित्र् पूर्वंगमं कृत्वा सकल सत्वराशिऽनुत्तरज्ञान फलं प्राप्नुवन्तु।

स्वस्ति श्रीमत्पशुपतिचरणकमलधूलिधूशरित शिरोरूह श्रीमन्मानेश्वरीष्टदेवता वरलब्धप्रसाद देदिप्यमानमानोन्नत रविकुलतिलक हनुमध्वज नेपालेश्वर महाराजाधिराज राजराजेन्द्र सकलराज चक्राधीश्वर श्रीश्रीजयभूपालेन्द्रमल्लदेवस्य विजयराज्ये ॥ ॥

शुभ संवत् ८१४ माघमासे शुक्लपक्षे श्रीपञ्चम्यांतिथौ उत्तराफालगुनी नक्षत्रे अतिगण्ड़योगे।

CC-0. Nepal Sanskrit Academy, Kathmandu



## कारण्डव्यूहः

क्रमाङ्कः ६५ विषयाङ्कः ३३

ग्रन्थकारः— —। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ५। आकारः १२×२½। ग्रन्थसंख्या१६००। पत्रसंख्या १३७। अपूर्णः।

## कारण्ड्व्यूहः

क्रमाङ्कः २८९ विषयाङ्कः ३४

ग्रन्थकारः । नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ५। आकारः १०×३। ग्रन्थसंख्या १६००। पत्रसंख्या १०४। पूर्णः।
सम्बत् ९३४ माघमासे शुक्लपक्षे प्रतिपत्तिथौ श्रवण नक्षत्रे शुद्धियोगे शनिश्चरवारे एतत्दिने लिखितं सम्पूर्णम्।

क्रमाङ्कः ६८५० विषयाङ्कः ३५

ग्रन्थकारः— — —। नेपालीयं कागतम् नेवारी लिपिः। पङ्क्तयः ६। आकारः १२½×३½। ग्रन्थसंख्या १०८। पत्रसंख्या ९। प्रकीर्णः।

## कारण्ड्व्यूहः

क्रमाङ्कः ७४५८ विषयाङ्कः ३६

ग्रन्थकारः — —। नेपालीयं कागतम्। रञ्जना लिपिः। पङ्क्तयः । आकारः। । । ग्रन्थसंख्या । पत्रसंख्या ८७। पूर्णः।

## कोषकारिका

क्रमाङ्कः प्र १३९ विषयाङ्कः ३७

ग्रन्थकारः— — —। ताड़पत्राणि। नेवारी लिपिः। पङ्क्तयः ५। आकारः ८½×२½। ग्रन्थसंख्या १४०। पत्रसंख्या १४। अपूर्णा।

CC-0. Nepal Sanskrit Academy, Kathmandu



आदिवाक्यम् —

नमोमञ्जुश्री

धर्मपुद्गल नैरात्म्यं नत्वा तदुपदिश्यते ।
वैभाषा सूत्र विज्ञान मध्यमानुक्रमानुमातृस्फुटश्च ।
आकाशं द्वौ निरोधौ च नित्यं त्रयमसंस्कृतम् ।
न च नित्यो न चा नित्यः पुद्गलश्चेतिचकेन ।।

पुष्पिका वाक्यानि—

सूत्रान्त स्थिति समासः ।
इति साकार योगाचार स्थिति समासः ।
इति मध्यमा स्थिति समासः ।

अन्त वाक्यम्—

स्वाधारां हि यथा खड्ग : ग्रंवै अग्रङ्गुलिर्यथा ।
न छिंदतेन स्पृशते तथा चित्तं — —

अतः परं खण्डितम्

## कोषकारिका

क्रमाङ्कः१४३ विषयाङ्कः३६

ग्रन्थकारः — — । चित्रपत्रम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः ८½×२½ । ग्रन्थसंख्या १४० । पत्रसंख्या २८ । अपूर्णम् ।

## क्षणभङ्ग सिद्धि

क्रमाङ्कः २५८ विषयाङ्कः३७

ग्रन्थकारः— रत्नकीर्तिपादः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ७ । आकारः । १३४ । ग्रन्थसंख्या६८०। पत्रसंख्या ३३ ।

CC-0. Nepal Sanskrit Academy, Kathmandu



आदिवाक्यम्—

नमः समन्तभद्राय

आक्षिप्त व्यतिकाया व्याप्तिरन्वय रूपिणी ।
सा धर्म्य वाह दृष्टा ते सत्वहेतोरिहोच्यते ॥

यत् सत् तत् क्षणिकं यथा घटः ॥ सन्त श्चामी विवादादि धूतार्था इति । हेतोः परोक्षार्थ प्रतिपादकत्वं हेत्वाभासत्वं शङ्का निराकरण मन्तरेण न शक्यते प्रतिपाद्यितुं ॥ हेत्वा भासाश्च प्रसिद्धा विरुद्धानेकान्तिक भेदेन त्रिविधा । तत्र तावद्यमसिद्धि हेतु यदि नामदर्शने नानाप्रकारं सत्वलक्षणमुक्तमास्ते ।

अन्तिमं वाक्यम्—

प्रकृते सर्व धर्म्माणां यद्वोधान्मुक्तिरिष्यते ।
स एव तिर्थ्य निर्मार्थी क्षणभङ्ग प्रसाधिते ॥

विपक्षे वा धनाद्धेतो साध्यात्मत्वं प्रसिध्यति ।
तत् सिद्धौ द्विविधा व्याप्ति सिद्धिरत्राभिधीयते ॥

इति वैधर्म्मादृष्टान्ने व्यतिरेकरूपव्याप्ता क्षणभङ्गसिद्धिसमाप्त ।
कृतिरियं महापण्डित रत्नकीर्त्तिपादानाम् ।

## ख्यातिवादविचार ग्रन्थः

क्रमाङ्कः प्र १३७ विषयाङ्कः ३८

ग्रन्थकारः— — — । ताड़पत्राणि । मागधी लिपिः । पङ्क्तयः ६ । आकारः १३ × २½ । ग्रन्थसंख्या ६० । पत्रसंख्या ३ । आदिमध्यान्तखण्डितः ।

CC-0. Nepal Sanskrit Academy, Kathmandu



# गण्डव्यूहः

क्रमाङ्कः ७५ विषयाङ्कः ३९

ग्रन्थकारः— — — । नेपालीयं कागतम् । नेवारी लिपि : । पङ्क्तयः ६ ।
आकारः १६×०६½ । ग्रन्थसंख्या १०००० । पत्रसंख्या २८८ । पूर्णम् ।

आदिवाक्यम्—

ॐ नमः सर्व बुद्धबोधिसत्वेभ्यः

गण्डव्यूह महार्णव स्तोत्र निनादि भो जिनसुतानां
पर्षन्मण्डल सागर नाम्ना व्यूहादिकं प्रोक्तम् ॥
सुगत समाध्यवतरणा चिंत्य बुद्ध विदर्शनं चैव
धीमत्संगा गमनं श्रावक विषयानुगमनं च ॥
स्तुति मेधा चिन्त्य महद्बुद्धोत्पाद प्रकाशकं सुधियाम् ।
सद्धर्मरत्न सागर समंत भद्रार्थं निर्देशम् ॥

सर्वतथागत सुरुचिर समाधि सागर परंपरा वगमाज्जिनसुत समाधि सागर परं परा श्चानुगन्तव्याः ॥ इति सुगत समाधि शतैर्विमोक्ष सागर परं पराभि श्च सुगतात्मजेन सुधिया मंजुश्रीनामधेयेन ।

अन्तिमवाक्यम्—

इदमवोचद्भगवांनात्तमना सुधनः । श्रे ष्ठिदारक स्ते च बोधिसत्वा आर्य्य मञ्जुश्री पूर्वंगमा स्ते च भिक्षव आर्य्य मञ्जुश्री परिपाचिता स्ते चार्य्य मैत्रेय पूर्व्वङ्गमाः सर्व्वे भद्रकल्पिका बोधिसत्वा स्तथा चार्य्य समन्त भद्र बोधिसत्व प्रमुखाः यौवराज्याभिषिक्ताः परमाणुरजः समाबोधिसत्वा नाना

CC-0. Nepal Sanskrit Academy, Kathmandu



## गण्डव्यूहः

क्रमाङ्कः १०३ विषयाङ्कः ४०

ग्रन्थकारः– –। नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः २१×४ $\frac{१}{२}$ । ग्रन्थसंख्या १०००० । पत्रसंख्या २९० । पूर्णः ।

## गर्भाधानादि विधानम् (मञ्जुपाराजिका वा)

### विनयसूत्रोद्धृत पापमोचन पटलः

क्रमाङ्कः २८१ विषयाङ्कः ४१

ग्रन्थकारः— — —। नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः ८×४ । ग्रन्थसंख्या १०० । पत्रसंख्या २६ ।

आदिवाक्यम्–

नमस्त्रिरत्नाय

बुद्धं धर्म्मश्च संघश्च त्रिरताग्रमनुत्तरम् ।
प्रणम्य सहसोवाच मञ्जुश्रीः करुणाम्वरम् ॥
संसाराब्धौ महाघोरे निमग्नाः सर्वजन्तवः ।
तारयिष्यन्ति मान्नाथ देशयस्त्वं कथं मुने ॥
आजीवादंकुरं यावत्पर्य्यन्तं वोधिमण्डपम् ।
यम नियम शुचि शान्ति कथं पाराजिका पुनः ॥

पुष्पिका वाक्यानि—

इति नारि छेदनं ।
इति प्रव्रज्याविधिः द्वितीयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu



इति शुचिकर्म विधिः तृतीय..।

इति मुनीन्द्र भगवात् श्रीघनभाषित नित्याचारणविधि श्चतुर्थः ।

इति शुद्धिनियमपञ्चमः ।

इति प्रदानविधिः षष्ठः ।

इति चतुर्वर्ण्णादि वधपाराजिका ।

हिंसा पाराजिकाधिकारः ।

पतितपाराजिकाधिकारः ।

इति अभक्षाभक्ष शुचि निर्देशः ।

गुरु तन्यक निर्देशः ।

इति शुचिनिर्देशः ।

इति व्रत निर्देशः ।

इति पञ्चगव्य विशुद्धिः ।

इति सर्वतथागत द्वादशसातस्रप.राजिकाविनयसूत्रोद्धृत श्रीमन्मुनीन्द्रमुखकमल विनिर्गत पापपरिमोचनो नाम निर्देशः पटलः समाप्त ॥ ॥

## गुणकारण्डव्यूहः

( आर्यावलोकितेश्वरमहायान सूत्रराजः )

क्रमाङ्कः १६२ — विषयाङ्कः ४२

ग्रन्थकारः– – । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः १५×४ । ग्रन्थसंख्या ४०८० । पत्रसंख्या २०४ ।

आदिवाक्यम् —

ॐनमः श्रीरत्नत्रयाय ॥ सर्व्वबुद्धबोधिसत्वेभ्यो नमः ॥

यः श्रीघनो महाबुद्धो सर्व्वलोकाधिपो जिनः ।

ते नाथं शरणं गत्वा वक्ष्ये लोकेश सत्कथां ॥

CC-0. Nepal Sanskrit Academy, Kathmandu



या श्रीभगवतीदेवी सद्धर्ममधिपेश्वरी ।
तस्या भक्तिप्रसादेन वक्ष्यामि बोधिसाधनं ॥

येन संपालितं सर्व्वं त्रैधातुकमिदञ्जगत् ।
तस्य लोकेश्वरस्याहं वन्दे सद्धर्मसाधनं ॥
तद्यथाभूत्महासत्वो जिन श्रीराज आत्मवित् ।
त्रिरत्नशरणं गत्वा गतिरर्ह जिनात्मनः ॥

एकस्मिं समये सोहं बोधिमण्डे जिनाश्रमे ।
बोधिचर्य्याव्रतं धृत्वा जगद्धिते समाश्रयेत् ॥
तदा तत्र महाभिज्ञो जय श्रीर्यतिरात्मवित् ।
सद्धर्मं समुपादेष्टुं सभासन समाश्रयेत् ॥

पुष्पिका वाक्यानि—

इति श्रीत्रिरत्न भजनानुशंशा वदानं समाप्तम् ।
इत्यवीचि संशोषण धर्मराजाभिबोधन प्रकरणम् ।
इति महेश्वरादिदेव समुत्पादन प्रकरणम् ।
इति श्रीसर्व्वसत्व प्रबोधन सद्धर्म संचारणं प्रकरणं समाप्तम् ।
इति दुर्दान्तादनवप्रबोधन बोधिचर्यावतारण प्रकरणम् ।
इत्यधोमुखसत्वोद्धारण प्रकरणम् ।
इति रूप्यमयीभूमी चतुष्पाद पुरुषोद्धारण प्रकरणम् ।
इति वलिसंबोधन बोधिमार्ग्गावतारण प्रकरण समाप्तम् ।
इति तमोन्धकारभूमि यक्षराक्षस परिबोधन सद्धर्मावतारण प्रकरणम् समाप्त ।
इति शुद्धावासिक सुकुण्डलदेवपुत्रोद्धारण प्रकरणं समाप्तम् ।
इति सिंहलद्वीपराक्षसीपरिबोधनोद्धारण प्रकरणं समाप्तम् ।
इति वाराणशी कृमिकीटोद्धारण प्रकरणं समाप्तम् ।
इति मागधिकसत्वप्रबोधोद्धारण प्रकरणं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu



इति जेताराम विश्वभूदर्शन सुखावतीप्रत्युद्गम प्रकरणं समाप्तम् ।

इति सिंहलसार्थवाहोद्धारण प्रकरणं समाप्तम् ।

इति सर्वसत्वोद्धरण संवोधिमार्गस्थापन महेश्वरोमादेवीसम्बोधि व्याकरणोपदेश प्रकरणं समाप्तम् ।

इति सर्व्वसभालोक सद्धर्म्म श्रवणोत्साह संप्रमोदित स्वस्वालय प्रतिगमन प्रकरणं समाप्तम् ।

इति शिक्षासम्वर समुद्देश प्रकरणं समाप्तम् ।

इति जिनश्रीराज परिपृच्छ जयश्री संप्रभाषित श्रीमदार्य्यालोकितेश्वर गुणकारण्डव्यूहसूत्रराजं समाप्तम् ।

येधर्म्मा हेतु प्रभवा हेतु तेषां तथागताः ।
ह्यवदत्तेषां च यो निरोध एवं वादी महश्रमणः ॥

## गुणकारण्डव्यूहः

( आर्यावलोकितेश्वर महायानसूत्रराजः )

क्रमाङ्कः२३६

यिषयाङ्कः४३

ग्रन्थकारः — । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः १४×४ । ग्रन्थसंख्या ४०८० । पत्रसंख्या २०० । पूर्णम् ।

शुभसंवत् ६८३ मिति पौषसुदि १३ स न्हापायागु मजियाओ न्हुगुतनाओ चोयाजुर ॥

तैलात् रक्षजलाद्रक्ष मुषीकासग्निमादिनं ।
मूर्खहस्तेनदातव्यं एवं वदति पुस्तकाः ॥

थ्वतेया पुण्यनं दानपतिया जन धन संतान सप्तवृद्धिफल त्वरितं प्राप्नुयात् भवन्तु शुभं ॥ सर्व्वदाकारे शुभमंगर भवतिम् । शुभं ॥

CC-0. Nepal Sanskrit Academy, Kathmandu



या श्रीभगवतीदेवी सद्धर्मामधिपेश्वरी ।
तस्या भक्तिप्रसादेन वक्ष्यामि बोधिसाधनं ॥
येन संपालितं सर्व्वं त्रैधातुकमिदञ्जगत् ।
तस्य लोकेश्वरस्याहं वन्दे सद्धर्मसाधनं ॥
तद्यथाभूत्महासत्वो जिन श्रीराज आत्मवित् ।
त्रिरत्नशरणं गत्वा गतिरर्ह जिनात्मनः ॥
एकस्मिं समये सोहं बोधिमण्डे जिनाश्रमे ।
बोधिचर्य्याव्रतं धृत्वा जगद्धिते समाश्रयेत् ॥
तदा तत्र महाभिज्ञो जय श्रीर्यतिरात्मवित् ।
सद्धर्मं समुपादेष्टुं सभासन समाश्रयेत् ॥

पुष्पिका वाक्यानि—

इति श्रीत्रिरत्न भजनानुशंशा वदानं समाप्तम् ।
इत्यवीचि संशोषण धर्मराजाभिवोधन प्रकरणम् ।
इति महेश्वरादिदेव समुत्पादन प्रकरणम् ।
इति श्रीसर्व्वसत्व प्रवोधन सद्धर्म संचारणं प्रकरणं समाप्तम् ।
इति दुर्दान्तादनवप्रवोधन वोधिचर्यावतारण प्रकरणम् ।
इत्यधोमुखसत्वोद्धारण प्रकरणम् ।
इति रूप्ययीभूमी चतुष्पाद पुरुषोद्धारण प्रकरणम् ।
इति वलिसंवोधन वोधिमार्ग्गावतारण प्रकरण समाप्तम् ।
इति तमोन्धकारभूमि यक्षराक्षस परिवोधन सद्धर्मावतारण प्रकरणम् समाप्त ।
इति शुद्धावासिक सुकुण्डलदेवपुत्रोद्धारण प्रकरणं समाप्तम् ।
इति सिंहलद्वीपराक्षसीपरिवोधनोद्धारण प्रकरणं समाप्तम् ।
इति वाराणशी कृमिकीटोद्धारण प्रकरणं समाप्तम् ।
इति मागधिकसत्वप्रबोधोद्धारण प्रकरणं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu



इति जेताराम विश्वभूदर्शन सुखावतीप्रत्युद्गम प्रकरणं समाप्तम् ।

इति सिंहलसार्थवाहोद्धारण प्रकरणं समाप्तम् ।

इति सर्वसत्वोद्धरण संवोधिमार्गस्थापन महेश्वरोमादेवीसम्बोधि व्याकरणोपदेश प्रकरणं समाप्तम् ।

इति सर्व्वसभालोक सद्धर्म्म श्रवणोत्साह संप्रमोदित स्वस्वालय प्रतिगमन प्रकरणं समाप्तम् ।

इति शिक्षासम्वर समुद्देश प्रकरणं समाप्तम् ।

इति जिनश्रीराज परिपृच्छ जयश्री संप्रभावित श्रीमदार्य्यालोकितेश्वर गुणकारण्ड-व्यूहसूत्रराजं समाप्तम् ।

येधर्म्मा हेतु प्रभवा हेतु तेषां तथागताः ।
ह्यवदत्तेषां च यो निरोध एवं वादी महश्रमणः ॥

## गुणकारण्डव्यूहः

( आर्यावलोकितेश्वर महायानसूत्रराजः )

यिषयाङ्कः४३

क्रमाङ्कः२३६

ग्रन्थकारः — । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः १४×४ । ग्रन्थसंख्या ४०८० । पत्रसंख्या २०० । पूर्णम् ।

शुभसंवत् ६८३ मिति पौषसुदि १३ स न्हापायागु मजियाओ न्हुगुतनाओ चोयाजुर ॥

तैलात् रक्षजलाद्रक्ष मुषीकामग्निमादिनं ।
मूर्खहस्तेनदातव्यं एवं वदति पुस्तकाः ॥

थ्वतेया पुण्यनं दानपतिया जन धन संतान सप्तवृद्धिफल त्वरितं प्राप्नुयात् भवन्तु शुभं ॥ सर्व्वदाकारे शुभंमंगर भवतिम् । शुभं ॥

CC-0. Nepal Sanskrit Academy, Kathmandu



## गुणकारण्डव्यूहः

( आर्यावलोकितेश्वरमहायानसूत्ररत्नराजः )

क्रमाङ्कः १७८ विषयाङ्कः ४४

ग्रन्थकारः —। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ५। आकारः १४×३। ग्रन्थसंख्या ६००। पत्रसंख्या ४२। प्रकीर्णः।

## गुणकारण्डव्यूहः

( आर्यावलोकितेश्वरमहायानसूत्ररत्नराजः )

क्रमाङ्कः १७९ विषयाङ्कः ४५

ग्रन्थकारः— — —। नेपालीयं कागतम्। नेवारी लिपि :। पङ्क्तयः ६। आकारः १३×२३/४। ग्रन्थसंख्या ३६००। पत्रसंख्या २००। अपूर्णः।

## जातिनिराकृतिः

क्रमाङ्कः २६१ विषयाङ्कः ४६

ग्रन्थकारः— जितारिपादः। मध्यदेशीयं कागतम्। देवनागरीलिपिः। पङ्क्तयोऽनियताः। आकारः ।ग्रन्थसंख्या १३०। पत्रसंख्या ६।

आदिवाक्यम्—

नमो मन्जुश्रिये

मुग्धाङ्गुली किसलयाङ्घ्रि सुवर्णकुम्भ-
वान्तेन कापिपयसा द्युसृणारुणेन।
योवन्द मानमभिषिश्चति धर्मराज्ये
जागर्तुवो हितसुखाय स मन्जुनाथः॥

CC-0. Nepal Sanskrit Academy, Kathmandu



सुहृनामनुरोधेन यथामति यथा स्मृति ।
ह्रियं विहाय लिख्येन्ते वादस्थानानि कानिचिद् ॥

तत्र तावदादौ जातिवाद एव निराक्रियते । इह यद्वस्तुनो भेदा भेदाभ्या-
मभिधेयं न भवति तद्वस्तु न भवति । यथा व्योम कमलम् ।

अन्तिमंवाक्यम्—

तथा भावे हि तदेवेदं बुद्धिज्वालात्वमिति स्यात् न तु सैवेय ज्वालात तस्मान्ना-
नैकान्तिको हेतु रित्यलं वहुभाषितयेति ॥
जातिनिाक्रतिरियं जितारिपादानाम् ।

## तत्वप्रकाशस्यान्तिमंपत्रम्

क्रमाङ्कः १४० विषयाङ्कः ४७

ग्रन्थकारः— नागार्जुन । ताड़पत्रम् । नेवारी लिपिः । पङ्क्तयः ८ । आकारः
११×२ । ग्रन्थसंख्या १० । पत्रसंख्या १ । अपूर्णम् ।

अन्तिमं वाक्यम्—

आर्य नागार्जुनैरिष्टं बुद्धधर्म्मानुसारतः ।
धर्मतत्वमनुत्पादो व्याकृतास्तै तथागतैः ॥
कृत्वा तत्वप्रकाशं यत्पुण्यमानोदितम्नया ।
तेनास्तु सकलालोका युगनद्धस्यभाजनं ॥
तत्वप्रकाश समाप्तः ।

## तत्वरत्नावलोकः
( विवरणसहितः )

क्रमाङ्कः २५२ विषयाङ्कः ४८

ग्रन्थकारः—पण्डिताचार्य वागीश्वरकीर्त्तिः । नेपालीयं कागतम् । नेवारी [illegible]

CC-0. Nepal Sanskrit Academy, Kathmandu



पङ्क्तयः ८।६ । आकारः ६ $\frac{1}{2}$ × ३ । ग्रन्थसंख्या २७६ । पत्रसंख्या १० ।

आदिवाक्यम्—

नमः श्रीसद्गुरुपादेभ्यः

अनुपम सुखरूपी श्रीनिवासी निवासो
निरुपम दस देवीरूप विघ्नः स विघ्नः ।
त्रिभुवन हित सौख्य प्राप्तिकारोऽविकारा
जयति कमलपाणि र्यविदाशा विकासाः ॥

श्रीमन्त्रनीति गतचारु चतुर्थसेकरूपं विदन्ति न हि येस्फुट शव्दशून्यं ।
नानोपदेश गण सकुलसत्तभेदेस्तेपां स्फुटावगतये क्रियते प्रयत्नः ॥

अन्तिमं वाक्यम्—

श्रीसमाजे परा यस्य भक्तिनिष्ठा च निर्मला ।
तस्य वागीश्वरस्येयं कृतिर्विंसति नासनी ॥
विकाररक्तामुदवीरतारा कुन्दनुकारि प्रचितमपि च पुण्यंयन्मया ग्रन्थितोऽस्मात् ।
अनुपम सुखपूर्णः स्वाभवियोपगूढ़ो, भवतु निखिललोकस्तेन वागीश्वर श्रीः ॥
तत्वरत्नावलोक विवरणं समाप्तं ॥
कृतिरियं पण्डिताचार्यं वागीश्वरकीर्त्तिपादानां ॥ शुभम् ॥

## त्रिंशिकाकारिका सभाष्या

विषयाङ्कः ४६

क्रमाङ्कः २६०

ग्रन्थकारः — वसुवन्धुः । मध्यदेशीयं कागतम् । देवनारी लिपिः । पङ्क्तयः १६ । आकारः ८×६ $\frac{1}{2}$ । ग्रन्थसंख्या २७६ । पत्रसंख्या २४ । अपूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu



अन्तवाक्यम्—

णपना चित्ताभिसंस्कारो मनस श्रेष्ठा यस्यां सत्यामालम्बनं प्रति चेतसः प्रस्यन्द इवभवति ।

अन्मिमं वाक्यम्—

विज्ञान परिणामोयं विकल्पो यद्विकल्प्यते ।
तेन तन्नास्तितेनेदं सर्वं विज्ञप्तिमात्रकमिति ॥

योयं विज्ञान परिणामस्त्रिविधोऽनन्त

अतः परं खण्डितम्— ।

## त्रिंशिकाविज्ञप्तिभाष्यम्

क्रमाङ्कः २५५ | विषयाङ्कः ५०

ग्रन्थकारः — । स्थिरमतिः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः १३×५ । ग्रन्थसंख्या ४३२ । पत्रसंख्या १३ । मध्यखण्डितम् ।

आदिवाक्यम्—

श्रीः ॥ अथ त्रिंशिकाविज्ञप्ति भाष्यम्

पुद्गलधर्म नैरात्म्ययोरप्रतिपन्नविप्रति पन्नानामविपरी पुद्गलधर्मनैरात्म्य प्रतिपादनार्थं त्रिंशिकाविज्ञप्ति प्रकरणारम्भः ॥ पुद्गलधर्मनैरात्म्य प्रतिपादनं पुनः क्लेश ज्ञेयावरण प्रहाणार्थम् । तथा ह्यात्मदृष्टि प्रभवा रागादयः क्लेशाः पुद्गलनैरात्म्यावबोधश्च सत्कायदृष्टेः प्रतिपक्षत्वात्तत्प्रहाणाय प्रवर्तमानः सर्वक्लेशान्प्रजहाति ।

अन्तिमं वाक्यम्—

महामुनेरिति परममौनेय योगाद्बुद्धोभगवान्महामुनिरिति ॥
त्रिंशिकाविज्ञप्तिभाष्यं समाप्तम् ।
कृतिराचार्य स्थिरमतेः ।

CC-0. Nepal Sanskrit Academy, Kathmandu



## त्रिंशिकाविज्ञप्तिभाष्यम्

क्रमाङ्कः २६२ विषयाङ्कः ५१

ग्रन्थकारः — स्थिरमतिः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः । आकारः । ग्रन्थसंख्या । पत्रसंख्या । अपूर्णम् ।

## त्रिंशिकाविज्ञप्तिभाष्यम्

क्रमाङ्कः १३६ विषयाङ्कः ५२

ग्रन्थकारः— स्थिरमतिः । ताड़पत्राणि । मागधी लिपिः । पङ्क्तयः ७।८ । आकारः १३×२$\frac{1}{3}$ । ग्रन्थसंख्या ४४८ । पत्रसंख्या १४ । मध्यखण्डितम् ।

## त्रिस्वभावकारिका
## विंशिका विज्ञप्तिकारिका
## त्रिंशिकाकारिका च

क्रमाङ्कः ६४६२ विषयाङ्कः ५३

ग्रन्थकारः— वसुवन्धुः । ताड़पत्राणि । प्राचीननेवारी लिपिः । पङ्क्तयः ६ । आकारः ११$\frac{1}{3}$×२ । ग्रन्थसंख्या १०८ । पत्रसंख्या ५ ।

आदिवाक्यम् —

नमो मञ्जुनाथाय

कल्पितः पर– – – रि निष्पन्नमेव च ।<br>
त्रयः स्वभावा धीराणाङ्गम्भीरं ज्ञेयमिष्यते ॥<br>
यत् ख्याति परतन्त्रोऽसौ यथा ख्याति स कल्पितः ।<br>
प्रत्ययाधीन वृत्तित्वात्कल्पनामात्र भावतः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu



अन्तिमं वाक्यम्—

अचिन्त्योऽनुपलम्भोसौ ज्ञानं लोकोत्तरश्च तत् ।
आश्रयस्य परावृत्ति द्विपादौस्तुल्यहानितः ॥
सएवानाश्रवोधी तु रचिन्त्यः कुशला ध्रुवः ।
सुखो विमुक्तिकायोसौ धर्म्माख्योपि महामुनेः ॥
कृतिराचार्य वसुबन्धुपादानां त्रिंशिकाकारिका समाप्तेति ॥

## दशाकुशलफलम्

क्रमाङ्कः ६१ विषयाङ्कः ५४

ग्रन्थकारः— श्रीदिवाकारः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः १०।११ । आकारः १५×३ । ग्रन्थसंक्या १४० । पत्रसंख्या ७ ।

आदि खण्डितम् ।
पुष्पिका वाक्यानि—

इति दशाकुशल कर्मफलनिश्चये प्राणातिपातफल निर्देशः प्रथम. परिच्छेदः ।
" " अदत्तादानफलनिर्देशो द्वितीयः परिच्छेदः ।
" " काममिथ्याचारनिर्देशस्तृतीयः परिच्छेदः ।
" " मृषावादफलनिर्देशश्चतुर्थः परिच्छेदः ।
" " पैशून्यफलनिर्देशः पञ्चमः परिच्छेदः ।
" " पारुष्यफलनिर्देशः षष्ठः परिच्छेदः ।
" " सम्भिन्नप्रलापनिर्देशः सप्तमः परिच्छेदः ।
" " ऽभिध्याफल निर्देशोऽष्टमः परिच्छेदः ।
" " व्यापादफल निर्देशो नवमः परिच्छेदः ।
" " मिथ्यादृष्टिफल निर्देशो दशमः परिच्छेदः ।
" " सतद्विरतिफलः सामान्यफलनिर्देश एकादश परिच्छेदः

CC-0. Nepal Sanskrit Academy, Kathmandu



अन्तिमं वाक्यम्—

समाप्तमिदं दशाकुशलकर्मफलंनामशास्त्रमिति ।
कृतिरियं श्रीदिवाकरेन्द्रस्येति ।

## दशभूमीश्वर महायानसूत्रम्

क्रमाङ्कः १०२ विषयाङ्कः ५५

ग्रन्थकारः । नेपालीयं कागजम् । नेवारी लिपि पङ्क्तयः ६ आकार१×४
ग्रन्थसंख्या २००० । पत्रसंख्या १५६ ।

आदि वाक्यम्—

ॐनम सर्वज्ञाय ॥ नमः सर्वबुद्धबोधिसत्वेभ्यः ।
यस्मित् पारमिता दशोत्तम गुणास्तैस्तैर्नयैः सूचिता
सर्वज्ञेन जगद्धिताय दश च प्रख्यापिता भूमयः ।
उच्छेद ध्रुववर्जिता च विमला प्रोक्तागतिर्मध्यमा
तत् सूत्र दशभूमिकं निगदितं शृण्वन्तु बोध्यर्थिनः ॥

एवम्मया श्रुतमेकस्मिंसमये भगवान् परनिर्मित वशवर्त्तिषु देवभुवनेषु विहरतिस्म ॥ अचिराभिसम्बुद्धो द्वितीय सप्ताहे वशवर्त्तिनो देवराजस्य विमाने मणिरत्नप्रभास्वरे प्रासादेमहता बोधिसत्वगणेन सार्द्धम् । सर्वैरवैवर्त्तिकैरेकजाति प्रतिवद्धैर्यदुतानुत्त-रायां सम्याक्संबोधौ ॥

पुष्पिका वाक्यानि—

इति प्रमुदितानाम प्रथमा बोधिसत्वभूमिः ।
इति विमलानाम द्वितीया बोधिसत्वभूमिः ।
प्रभाकरीनाम तृतीया बोधिसत्व भूमिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu



अर्चिष्मतीनाम चतुर्थीभूमिः ।
सुदुर्जयानाम पञ्चमी वोधिसत्वभूमिः ।
अभिमुखीनाम षष्ठी वोधिसत्वभूमिः ।
दूरंगमानाम सप्तमी वोधिसत्वभूमिः ।
अचलानानाष्टमी वोधिसत्वभूमिः ।
साधुमतीनाम नवमी वोधिसत्वभूमिः ।
धर्ममेघानाम वोधिसत्वभूमिदशमीः ।
इति श्रीवोधिसत्वचर्याप्रस्थानो दशभूमीश्वरो नाम महायानसूत्र रत्नराजः समाप्तः ।

## दशभूमीश्वरमहायानसूत्रम्

क्रमाङ्कः ७८ विषयाङ्कः ५६

ग्रन्थकारः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७ आकारः १८½×५½ । ग्रन्थसंख्या ३३०० । पत्रसंख्या १०२ । पूर्णम् ।

स्वस्ति श्रीगिरिराज चक्रचूडामणि नरनारायणेत्यादिविविधविरुदावलीविराजमान मानोन्नत महिमण्डलनेपालेश्वरनरपतिसहस्रसंसेव्यमानचरणकमल विविध्यन्दनीरमणी हेमपद्मराग वज्रवैडूर्यमुक्तारत्न समूहसमौकृत यक्षाधिप त्रिभव विद्याधर सहस्रोङ्गियमानकीर्त्ति सर्वाङ्गसुन्दर श्रीमहाराजाधिराज श्री ३ सुरेन्द्र विक्रमसाह समरजङ मासमरविजयी विजयराज्ये ।
देतेधर्म्मोऽयं प्रवर महायानयायिन परमधार्मिके धर्मात्मा शाक्यभिक्षु भाजुवीर प्रमुखादि स्वगणाना नदत्रपुण्यं तद्भवत्वाचार्योपाध्याय मातापितृ पूर्वङ्गमकृत्वा सकलसत्वराशीनामनुत्तरज्ञानफलं प्राप्नुयोवन्तु ॥
भाषा शुभसम्वत् ९७२ मिति मारमासे शुक्लपक्षे दशम्यांतिथौ किर्त्तिका प्ररोहिनीनक्षेत्रे शनिश्चरवासरे एतद्दिने दानपति नेपालदेशे कान्तिपूरमहानगरे भास्करदेवसंस्कारित केशएचन्द्रकृत पारावत महाविहार मारिचिदेव्या चरणसेवक आत्मोक-

CC-0. Nepal Sanskrit Academy, Kathmandu



छेनामागृह वासिन शाक्यभिक्षु भाजुवीरभात्र चन्द्रवीर, भागुवीरकस्य भार्य्या रत्नमति तस्प प्रथमपुत्र हर्षवीर, द्वुतीयपुत्र लत्त्मीवीर तृतीयपुत्र शुशुभाजु ।। चन्द्र-वीर कस्यभार्या मयजुमति, तस्य पुत्र तथिधन थु तिसमुहजुस्य चोनावेलस, श्रीमाता ज्ञानमति मामयात भीमरथसथस्यं कर्मखनकाओ जात्र।यात्रा दिनजुलो ।। थुगु-दिनसं लाचकं, श्रीदशभूमीश्वर आदिनवखण्ड़ पुस्तक चोचकं प्रतिस्थायाङा दिनजुलो शुभ ।। ।। ध्वतेयापुण्यया प्रभावन इहलोक सुखसंपति, परलोक मोत्तगतिरनुत्तरफल प्राप्तयति सप्तपुरुषां सप्तरत्न वृत्तिरस्तु ।।

प्रज्ञापारमिता नमामि सततं घन्धादिव्यूहं दश–
भूमीकं च समाधिराज सहितं लंकावतारा भिध ।
सधर्मावुलुहंस गुह्यसमिति सौदर्यविस्तालिकं
श्रीसौवर्णप्रभाभिधश्च शिरसि धर्म्मार्थमुक्तिप्रदा ।।

लिखितं ललितापुरमहानगरे श्रीमानदेव संस्कारित चक्रमहा विहारात्रस्थित वज्राचार्य्य श्रीमणिदत्तेन संपूरर्णं लिखितं ।। शुभं ।

## दोहाकोषः पञ्जिका

क्रमाङ्कः १०४ विषयाङ्कः ५७

ग्रन्थकारः — भिल्लीपादः । ताड़पत्राणि । प्राचीन नेवारी लिपिः । पंङ्क्तयः ५ । आकारः ११×२ । ग्रन्थसंख्या १४० । पत्रसंख्या १४ । प्रकीर्णाः । जीर्णाः ।

आन्तवाक्यम्—

·········दस्यदोहायां क्रियने सारार्थपञ्जिका ।। इहखलु महायोगीश्वर भिल्लि–पादा महाकरुणायमानः सत्वार्थं स्वाधिगतमर्थम्प्रतिपादयितुकाम आह ।

अन्तिमवाक्यम्—

आलोके न चन्डाग्निज्ञानोल्कया ध्यानेन महासुखस्थ– स्थितिर्भवति । अयमत्र

CC-0. Nepal Sanskrit Academy, Kathmandu



संक्षेपार्थः । चण्डाली योगभावनया महासुखचक्रे चित्त-रीकरणं सहजस्फुटीकरण कारणमिति ॥

पुष्पिका——

श्रीमहायोगीश्वर भिल्लीपादस्य दोहाकोषपञ्जिका सार्थभञ्जिका नामसमाप्ता ।

## दोहकोष पञ्जिका
## विषमपद भञ्जिका

क्रमाङ्कः १०४ विषयाङ्कः ५८

ग्रन्थकारः—सरोजवज्रपादः । ताड़पत्राणि । प्राचीननेवारी लिपिः । पङ्क्तयः ५
आकारः ११×२ । ग्रन्थसंख्या ६४० । पत्रसंख्या ६४ । जीर्णा । प्रकीर्णा ।

आदिवाक्यम्—

नमःश्रीवज्रसत्वाय

नमस्कृत्य जगन्नाथान् गुरुन् सततमादरात् ।
लिख्यते दोहाकोषस्य शरजन्माय पञ्जिका ॥
सरोजवज्रपादैश्च कृतं तदागमानुगा ।
नकिञ्चापूर्वमुद्दिष्टं भगवान् कथिता पुर ॥
— — यत्तत्व न्नजानन्ति तदाश्रिताः ।
जाति वादादिमासृत्य ब्राह्मणादि निरर्थकः ।
भ्रमन्ति षट्——भ्रष्टामोचामोचात्मगर्हिता
प्रयत्न चानुमातञ्च प्रमाण द्वय वाह्यकाः ॥
सम्य—मार्ग्गविरहाच्चैव पापमित्रेषु सङ्ग्रहाः ।
तस्मात् गुर्वाराधनंयत् क्रियते साधुभिः सदा ॥
तस्य तुष्टया भवेत् मुक्ति इहलोके परत्रच ।
ददाति सर्वसद्भावं तथागतोक्तमारादि ॥

CC-0. Nepal Sanskrit Academy, Kathmandu



अन्त वाक्यम्—

कायजीवित निरापेक्षेण विहरिष्या ीतिभावः—यं दोहाकोषस्य पञ्जिका विषमपद भञ्जिका । दोहा अभिभ्रष्ट वचनस्यैति । तेन—कोषिताछादिता । तत्व वालजनेषु विस्मयी कृतमिति ॥ कृत्वा चेयं म— — पञ्जिका चात्मवोधिनी । नाम्नापि-सात्मवेधी च गुर्व्वाम्नाय प्रकाशिनी । अन्याश्च — —

अतः परं खण्डितम् ।

## धर्मकोषः

क्रमाङ्कः १५५ विषयाङ्कः ५६

ग्रन्थकारः — — । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ११ । आकारः १३×५३/४ । ग्रन्थसंख्या २१५५ । पत्रसंख्या ५७ । अपूर्णः ।

आदिवाक्यम्—

ॐनमः श्रीस्वयंभुवे

आदिवुद्ध ॥ मनसैवबुध्यते आदौयः निरंजत निराकारत्वात् ॥ ॥ निरंजन । निर्गत अञ्जनंलेपनादिकं यस्मिन् स ॥ गगनवत्, शून्यत्वात् । निराकाराः ॥ निर्गतः आकारो यस्य चक्षुराद्यवयव हीनत्वात् ॥ ॥ निराधारः ॥ निर्गत आधारो यस्य भुवनादिपात्र हीनत्वात् शून्यभावेन ॥ ॥ निरामयः ॥ निर्गत आमयो रोगादि, कायाद्यवयव शून्यत्वात् ॥ ॥ निर्विकल्पः ॥ निर्गता विशेषेण कल्पना,भावनारहितत्वात् ॥ ॥ निराकाश ॥ निर्गत आकाशं प्रकाशो वा दृश्यादृश्यरुपत्वात् नित्यानित्य ॥ नित्यश्चानित्यश्च ॥ स्थिरास्थिरश्च ॥ कायमनोरूपत्वात् ॥ ॥

अन्तवाक्यम्—

अथ लोकेश्वर नामानि ॥ नमो आर्यावलोकितेश्वराय ॥ १ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu



वज्रनाथ लोकेश्वराय ॥ पद्मपाणिलोकेश्वराय ॥ नित्यनाथलोकेश्वराय ॥ विद्यापतिलोकेश्वराय ॥ शंख — — —

अतः परं खण्डितम् ।

## धर्मसमुच्चयः

क्रमाङ्कः ५२ विषयाङ्कः ६०

ग्रन्थकारः– भिक्षु अवलोकितसिंहः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ७ । आकारः १२×५ । ग्रन्थसंख्या २२७० । पत्रसंख्या १२४ ।

आदि वाक्यम्—

ॐनमोबुद्धाय

प्रहीण सर्वाश्रव निर्मलश्रीर्यः क्लेशजम्वाल निमग्नलोकं ।
कृपा गुणेनोदहरत्समेन प्रणम्य तस्मै त्रिसवोत्तमाय ॥
सद्धर्म स्मृत्युपस्थान सूत्र वैपुल्य सागरात् ।
गाथाः समुद्धरिष्यामि लोक लोचन तत्पराः ॥
अप्रमाद स्तथा श्रद्धा वीर्य्यारम्भ स्तथा धृतिः ।
ज्ञानाभ्यासः सतां श्लेषो मोक्षस्यायतनानि षट् ॥

पुष्पिका वाक्यानि—

जितवर्ग्गः प्रथमः ।
धर्म्मोपदेशवर्गो द्वितीयः ।
कायजुगुप्सावर्गस्तृतीयः ।
परिवर्तवर्गश्चतुर्थः ।
अनित्यतावर्गः पञ्चमः ।
अप्रमोदवर्गः षष्ठः ।
कामजुगुप्सावर्गः सप्तमः ।

CC-0. Nepal Sanskrit Academy, Kathmandu



तृष्णावर्गोऽष्टमः ।
स्त्रीजुगुप्सावर्गो नवमः ।
मद्य जुगुप्सावर्गः दशमः ।
चित्तवर्गः एकादशः ।
वाचावर्गो द्वादशः ।
संयोजनवर्ग श्चतुर्दशः
नरकवर्गः षोड़शः ।
प्रेतवर्गः सप्तदशः ।
तिर्य्यग्वर्गोऽष्टादशः ।
क्षुधावर्ग एकोनविंशतितमः ।
कौशीयवर्गो विंशतितमः ।
करुणावर्ग एकविंशतितमः ।
दानवर्ग द्वाविंशतितमः ।
शीलवर्गस्त्रयो विंशतितमः ।
शान्तिवर्गश्चतुर्विंशतितमः ।
वीर्य्यवर्ग पंचविंशतितमः ।
ध्यानवर्ग षड्विंशतितमः ।
प्रज्ञावर्ग सप्तविंशतितमः ।
निर्वाणवर्गोऽ ष्टाविंशतितमः ।
मार्गवर्ग एकोनत्रिंशत्तमः ।
भिक्षुवर्ग त्रिंशः ।
पुण्यवर्ग एकत्रिंशतितमः ।
देववर्गो द्वात्रिंशत्तमम् ।
सुखवर्ग त्रयस्त्रिंशत्तमः ।
मित्रवर्ग श्चतुस्त्रिंशत्तमः ।
स्तुतिवर्गः षट् त्रिंशत्तमः ।

CC-0. Nepal Sanskrit Academy, Kathmandu



अन्तिमं वाक्यम्—

उदान पुण्यदेवप्रमुखा मित्रराजस्तुतिश्चाष्टम्विदुर्वुधाः।
ते वैपुल्य सधर्म्मपदा हितस्यस्मृत्युपस्थितेः सूत्रवराद्गिाथामयोद्धृता ॥
पुण्यमवाप्तमत्रक्लेशं विभिद्याजनावलांश्री।
यावेज्जगध्य।कुल तर्कनिष्टैः समाकुलवेति सत्यगवातेन ॥
मोह छित्वांचदिद हितस्य वाक्यमिधर्म्यो विपुलं जिनस्म।
धर्म्मसमुच्चयो नामः धर्म्मपर्य्याय समाप्तः।
वैपुल्य महागंभीरोदधिसूत्रवराद्भिक्षुअवलोकितसिंहेतोद्गतं इति।
अथ चतुरशीतिश्लोकाधिकः षट्शतोत्तरं सहस्रद्वयं ग्रन्थेदृष्टंस्फुरार्थये ॥ ॥
येधर्म्मात्यादि ॥ शुभम्।

## धर्मसंग्रहः

क्रमाङ्कः १५८ विषयाङ्कः ६१

ग्रन्थकारः—नागार्जुनः। नेपालीयं कागजम्। देवनागरी लिपिः। पङ्क्तयः ६।
आकरः १२½×३। ग्रन्थसंख्या२३६। पत्रसंख्या ६।

आदिवाक्यम्—

### नमोरत्नत्रयाय

रत्नत्रयं नमस्कृत्य सर्वसत्व हितोदयं।
कथ्यते मोहनाशाय धर्मसार समुच्चयं ॥

तत्र प्रथमंतावत्त्रीणिरत्नानि ॥ तद्यथा ॥ बुद्ध धर्म्म संघश्चेति त्रीणियानानि ॥ श्रावकयानं, प्रत्येकयानं, महायानञ्चेति।

अन्तिमं वाक्यम्—

तिस्रः शिक्षाः ॥ अधिचिन्तशिष्याः। अधिशीलशिक्षाः। अधिप्रज्ञपि शिक्षाश्चेति।

CC-0. Nepal Sanskrit Academy, Kathmandu



इति श्रीनागार्जुनपाद विरचितायां धर्मसंग्रहः समाप्तमिति ।

## धर्मसंग्रहः

क्रमाङ्कः १५६ विषयाङ्कः ६२

ग्रन्थकारः—नागार्जुनः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ५
आकारः १३×३ । ग्रन्थसंख्या २३६ । पत्रसंख्या १६ । पूर्णः ।

## धर्मसंग्रहः

क्रमाङ्कः १५७ विषयाङ्कः ६३

ग्रन्थकारः—नागार्जुनः । नेपालीयं कागजम् । देवागरी लिपिः । पङ्क्तयः ५ ।
आकारः ११½×३ । ग्रन्थसंख्या २३६ । पत्रसंख्या १७ । पूर्णम् ।

## धर्मसंग्रहः

क्रमाङ्कः १६० विषयाङ्कः ६४

ग्रन्थकारः— नागार्जुनः । ताडपत्राणि । नेवारी लिपिः । पङ्क्तयः ६ ।
आकारः १२×२ । ग्रन्थसंख्या ३८ । पत्रसंख्या ३ । खण्डितः ।

## धर्मसंग्रहः

क्रमाङ्कः ७१५७ विषयाङ्कः ६५

ग्रन्थकारः—नागार्जुनः । नेपालीयं कागजम । नेवारी लिपिः । पङ्क्तयः ५ ।
आकारः १०×३ । ग्रन्थसंख्या २३६ । पत्रसंख्या २३ । पूर्णः ।

## निगमपरिवर्त्तः

( ललितविस्तरस्य अन्तमपरिवर्तः )

क्रमाङ्कः ५३ विषयाङ्कः ६६

ग्रन्थकारः — — । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu



आकारः १२×३ । ग्रन्थसंख्या १०८ । पत्रसंख्या ६ ।

आदिवाक्यम्—

तत्र भगवन्त महेश्वर देवपुत्र प्रमुखां शुद्धावासकायिका देवपुत्रानामन्त्रयतेस्म ॥ अयंमार्षा ललितविस्तरोनाम धर्म्मपर्य्यायं सूत्रान्तो महावैपुल्य बोधिसत्व विक्रीडितः ।

अन्तिमं वाक्यम्—

इदमवोचद्भगवानान्तमनास्ते महेश्वरदेवपुत्रपूर्वगमाः शुद्धावासका देवपुत्राः मैत्रेयपूर्वगमाः सर्वबोधिसत्वा महासत्वा महाकाश्यप पूर्वगमाश्च सर्वमहाश्रावका सर्वदेवमानुषासुरगन्धर्वश्च लोको भगवतो भाषितमभ्यनन्दन्निति ॥

इति निगमपरिवर्त्तोनाम सप्तविंशतिमः ॥

## परमरहस्यसुखाभि संबोधिक्रमस्यान्तिमपत्रम्

क्रमाङ्कः १०४ विषयाङ्कः ६६

ग्रन्थकारः— नागार्जुनः । ताड़पत्रम् । नेवारी लिपिः । पङ्क्तयः ५

आकारः ११×२ । ग्रन्थसंख्या १७ । पत्रसंख्या १ । अपूर्णम् ।

अन्तिमवाक्यम्—

–लदृढमतिः सर्वभावस्वभावः ।
स्वच्छंशुद्धं सुसूक्ष्मं परम शिवमयं बुद्धनिर्वाणधातुं ।
निर्द्वन्दं निर्विकल्पं सततसु–यं भावयेत्तत्वयोगी ॥
पुण्यापुण्याद्विमुक्तः स्वयमिह भगवान् जायते वज्रसत्व इति ॥
परमरहस्य सुखाभि संबोधिक्रमः ॥
कृतिरियमाचार्य नागार्जुन पादानां ग्रन्थप्रमाणमस्य श्लोकानां चत्वारिंश च्चतुर्थः क्रमः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu



# पारमिता समासः

क्रमाङ्कः १४५

विषयाङ्कः ६८

ग्रन्थकारः— ———। ताड़पत्राणि । नेवारी लिपिः। पङ्क्तयः ७।
आकारः २१ × २। ग्रन्थसंख्या ५००। पत्रसंख्या १०

आदिवाक्यम्—

ॐ नमोबुद्धाय

तथागतानां पदमारुरुक्षरा श्रित्य रत्नत्रयमादरेण ।
बोधौ निधाय विचनं मनश्च कुर्यात् परात्मवृति हारमादौ ॥
ततःपरं दानविधौ प्रयोगः कार्यस्तथा लोकहितोन्मुखेन ।
तथास्वगात्राण्यपि याचितस्य न योग संकोच विरुपतास्यात् ॥
मात्सर्यदोषोपचया यथत्स्यानुयोग चित्तं परिवृंहयेद्वा ।
तन्त्यक्तमेवार्हति वोधिसत्वः परिग्रह च्छद्मममयं विघातं ॥
तद्बोधिसत्वः कथमादयत रत्नन्धीनम्वादिविधापिराज्यं ।
हन्यागचित्त प्रतिपत्तदर्चा सम्बोधिमार्गा वरणं करोति ॥

पुष्पिका वाक्यानि—

दानपारमिता समासः ।
शीलपारमिता समासः ।
क्षान्तिपारमिता समासः ।
वीर्यपारमिता समासः ।
ध्यानपारमिता समासः ।
प्रज्ञापारमिता सश्चायं पारमिता समासः ।

अन्तिमं वाक्यम्—

विशुद्ध मौनीन्द्र मनस्तत्याग प्रसूत सूत्रान्त सरोरुहेम्यः ।
आदाय सूर भ्रमरेण सम्य-धू-तं पारमिता समासे ।

CC-0. Nepal Sanskrit Academy, Kathmandu



## प्रज्ञापारमिता (स्ल्पात्तरादिस्त्रोम्)

क्रमाङ्कः ६८५० विषयाङ्कः ६९

ग्रन्थकारः– नागार्जुनः। नेपालीयं कागतम्। नेवारी। लिपिः पङ्क्तयः ६। आकारः १३×२३/४। ग्रन्थसंख्या २३०। पत्रसंख्या १०। प्रकीर्ण।

## प्रज्ञापारमिता (स्वल्पात्तरा)

क्रमाङ्कः १८४ विषयाङ्कः ७०

ग्रन्थकारः———। नेपालीयं कागजम्। नेवारी लिपिः। पङ्क्तयः ५। आकारः १३×२३/४। ग्रन्थसंख्या६०। पत्रसंख्या ४।

आदिवाक्यम्—

ॐ नमोभगवत्यै आर्य्यप्रज्ञापारमितायै

एवंमया श्रुतमेकमिंसमये भगवान् राजगृहे विहरतिस्म गृद्धकूटपर्वते महताभिक्षु संघेन सार्द्धमर्द्धत्रयोदशभिर्भिक्षुशतैरनेकैश्च वोधिसत्व कोटी नियुतशतसहस्रैः शक्र ब्रह्मलोकपाल प्रमुखैरनेकैश्च देवपुत्र कोटीनियुतसतसहस्रैः परिवृतः पुरस्कृतः श्रीरत्नगर्भ सिंहासने निषण्णो भगवान् धर्मन्देशयसिस्मः॥

अन्तिमंवाक्यम्—

इदमवोचद्भगवानास्ते च भित्तवस्ते च वोधिसत्वा महासत्वाः सा च सर्वावती पर्षत्सदेवमानुषासुरगन्धर्वश्च लोको भगवतो भाषितमभ्यनन्दन्निति॥
आर्य्यस्वल्पात्तरा भगवती प्रज्ञापारमिता समाप्ता॥
आर्य नागार्जुनपादैः पातालादुद्धृता इति॥

## प्रतीत्यसंमुत्पादव्याख्यानम्

कूमाङ्कः १३८ विषयाङ्कः ७१

ग्रन्थकारः—— —। ताड़पाणि। प्राचीन नेवारी लिपिः। पङ्क्तयः ७ आकारः

CC-0. Nepal Sanskrit Academy, Kathmandu



१३×२⅓ । ग्रन्थसंख्या १६८ । पत्रसंख्या ६ । प्रकीर्णम् ।

पुष्पिका वाक्यानि—

प्रतीत्यसमुत्पाद व्याख्याने वेदनाविभङ्गः समाप्तः ।
प्रतीत्यसमुत्पादव्याख्यायां तृष्णाविभङ्गः समाप्तः ।
प्रतीत्यसमुत्पादव्याख्याया मुपादानविभङ्गः समाप्तः ।

## प्रतीत्यसमुत्पाद व्याख्यानम्

क्रमाङ्कः १४२ विषयाङ्कः ७२

ग्रन्थकारः— — । चित्रम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः १२×२ । ग्रन्थसंख्या १६८ । पत्रसंख्या १२ । प्रकीर्णम् ।

## प्रामाण्यसादृश्यादिवादः

क्रमाङ्कः २६१ विषयाङ्कः ७३

ग्रन्थकारः — । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः ८×६⅓ । ग्रन्थसंख्या १०८ । पत्रसंख्या ७ । खण्डितः ।

अन्त वाक्यम्—

माणशब्दो ज्ञानेषु निर्मिवन्धन एव, सर्वज्ञानेषु प्रामाण्य व्यव (प) देश प्रसङ्गात् । निबन्धनश्च स्वविषय प्रतिवन्धादन्यत्नोपपद्यते । तस्मात्प्रमाणस्य प्रमाणव्यपदेश विषतत्वं स्वविषय प्रयिवन्धेन व्याप्तम् । अतःप्रमाणे धर्मिणि विपक्षे प्रामाण्यस्य विरुद्धव्याप्तलम्भेन विपक्षे व्यवच्छेदसिद्धे नानैकान्तिकोहेतुः । नचान्यो दोषः सम्भवी । तस्मान्निरस्ता शेषदोषेण हेतुना यत्प्रसिद्धं तदुपादेयमेव सताम्, पण्डितजितारिपादैरेव वेदाप्रामाण्ये दर्शितं ।

अन्त वाक्यम्—

तस्पाभावलक्षणप्रमेय परिच्छेदाभावात् परिच्छेदस्यज्ञान धर्मत्वात् । नापि ज्ञान

CC-0. Nepal Sanskrit Academy, Kathmandu



मात्र स्वभावोऽभावो वक्तव्यः । देशकाल स्वभावमपि विप्रकृष्टस्यापि इति ।

## बोधिचर्यावतारः

क्रमाङ्कः १८५

विषयाङ्कः ७४

ग्रन्थकारः—शान्तिदेवपादः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५।
आकारः १२×३ । ग्रन्थसंख्या १०८६ । पत्रसंख्या ६६ ।

आदिवाक्यम्—

ॐ नमःश्रीवज्रसत्वाय ॥ श्रीगुरुवेनमः ॥
ॐ नमः श्रीसर्वबुद्धबोधिसत्वेभ्यः ॥
सुगतान्ससुतान्सधर्मकायान् प्रणिपत्यादरतोऽखिलाश्च वंद्यान् ।
सुगतात्मज संवरावतारं कथयिष्यामि यथागमं समासात् ॥

पुष्पिकावाक्यानि—

बोधिचर्य्यावतारे बोधिचिन्तानुशंसपरिच्छेदः प्रथमः ।
„ पापदेशना द्वितीयःपरिच्छेदः ।
„ बोधिचित्तपरिग्रहतृतीयःपरिच्छेदः ।
„ बोधिचित्ताप्रमाद चतुर्थःपरिच्छेदः ।
„ संप्रजन्यलक्षण पञ्चमःपरिच्छेदः ।
„ क्षान्तिपारमिता षष्ठःपरिच्छेदः ।
„ वीर्य्यपारमिता सप्तमःपरिच्छेदः ।
„ ध्यानपारमिता परिच्छेदः ।
„ प्रज्ञापारमिता परिच्छेदनवमः ।

इति बोधिचर्य्यावतारे परिणामना परिच्छेदो दशमः ।

अन्तिमं वाक्यम्—

मञ्जुघोषं नमस्यामि यत्प्रसादात्मति शुभे ।

CC-0. Nepal Sanskrit Academy, Kathmandu



कल्याणमित्रं वन्देहं यत् प्रसादाच्च वर्द्धते ॥

समासाचेयं वोधिचर्य्यावतारे परिकथा ।

कृतिरियं आचार्य्य श्रीश्री शान्तिदेवपादानामिति ।

समयः—श्रेयोऽस्तुसम्वत् ९५० मिति नष्ट वैशाखशुदि त्रयादश्यां रविवारे पूर्णोऽभवत्ः ।
लिखितं रत्नकीतिविहार वज्राचार्य रत्नपतिन्दनेतिशुभम् ।

## वोधिचर्यावतारः

क्रमाङ्कः १९१

विषयाङ्कः ७५

ग्रन्थकारः— शान्तिदेवपादः । नेपालीयं कागतम् । नेवनागरी लिपिः । पङ्क्तयः ७। आकारः १३×४ । ग्रन्थसंख्या १०८९ । पत्रसंख्या ३९ । पूर्णः ।

## वोधिचर्यावतारः

क्रमाङ्कः ९१

विषयाङ्क ७६

ग्रन्थकारः— शान्तिदेवपादः नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७ । ८ । ९ । आकारः १५×३ । ग्रन्थसंख्या १०८९ । पत्रसंख्या ३५ । पूर्णः ।

## वोधिचर्यावतार टीका

क्रमाङ्कः ५२५१

विषयाङ्कः ७७

ग्रन्थकारः— प्रज्ञाकरः । नेपालीयं कागतम् । देवागरी लिपिः । पङ्क्तयः ८ । आकारः १३½×४½ । ग्रन्थसंख्या ६१९२ । पत्रसंख्या २९८ ।

आदिवाक्यम्—

ॐ नमोबुद्धायः

मूलम्—सुगतात् ससुतान्सद्धर्म्मकायान्प्रणिपत्यादरतोऽखिलाश्चवंद्यान् ।
सुगतात्मज सम्वरावतारं कथयिष्यामि यथागमं समासात् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu



**टीकायां—**

कथयिष्यामीति प्रयोजनाभिधानं सम्बन्ध प्रतिपादनपदं तु नविद्यते। सामर्थ्या-देवतु सम्प्रतिपत्तव्यः। यथागमिति स्वातंत्र्यपरिहारपदं। समासादिति पुनरुक्तता परिहार वचनं। इति समुदायार्थः।

**पुष्पिका वाक्यानि—**

प्रज्ञाकरमति कृतायां बोधिचर्यावतार पञ्जिकायां बोधिचित्तानुशंसाविवरणं प्रथम परिच्छेदः।

" " द्वितियःपरिच्छेदः।
" " तृतीय परिच्छेदः।
" " चतुर्थपरिच्छेदः।
" " पञ्चमपरिच्छेदः।
" " क्षान्तिपारमिता षष्ठपरिच्छेदः।
" " वीर्यपारमिता सप्तमपरिच्छेदः।

**अन्तिमं वाक्यम्—**

प्रज्ञाया विवृत्तिविधाय विशद व्याख्यापदैः संवृतं
सम्यग्ज्ञान विपक्ष दृष्टि निविडव्यामोह शान्त्यामया।
यत्पुण्यं समुपार्जितं हितफलं तेनाशु सर्वजनो
मञ्जुश्रीरिवसद्गुणैक वसतिः प्रज्ञाकरो जायतामिति॥
बोधिचर्यावतारे प्रज्ञापारमिता परिच्छेद टीका समाप्ता
कृतिरियं पण्डित भिक्षु प्रज्ञाकरपादानां।
टीकेयं परमासु यन्त्रित पदा शुद्धा मनो ह्लादिमी
संसारार्णव पारगामिनि जनें नौयान पात्रोपमा।
आशु प्राप्तिकरी जिनस्य पदवीमाद्यल्लिखित्वा मया
प्राप्तं यत्कुशलं सुसंपदि पदं तेनास्तु बुद्धोजनः।

CC-0. Nepal Sanskrit Academy, Kathmandu



श्रीसम्वत् १६७८ साल आश्विन शुदि द्वितीया सोमवार

## भद्रचरीप्रणिधानम्

क्रमाङ्कः ४१ विषयाङ्कः

ग्रन्थकारः— सुधनश्रेष्ठिदारकः । नेपालीयं कागजम् । नेवारी लिपि:
पङ्क्तयः ५ ।आकरः ११×४ । ग्रन्थसंख्या६१ । पत्रसंख्या ८ । सचित्रम्

अन्तिमं वाक्यम्—

ॐ नमःश्रीसमन्तभद्राय

अथ खलु समन्तभद्रो बोधिसत्वो महासत्व एता नेवलोकधातु परंपरा नभि
ध्यानभिलाप्य बुद्धक्षेत्र परमानुरज समाकल्पा कल्प पसरानभिद्योतयमान भूयस
मात्रया गाथा भिगीतेन प्रणि धानमकार्पित् ॥

यावत् केचिद्दशादिशिलोके सर्वत्रयध्वगतानरसिंहो ।
तानहु वन्दमि सर्विअशेषान् कायतुवाच मनेनप्रसन्नम् ॥

अन्तिमं वाक्यम्—

भद्रचरी परिणाग्य च प्राप्तं पुण्यमनन्त मतीव विशिष्टं ।
तेन जगद्भ्यसनौघ मिग्नं यात्वमिताभपुरिं वरमेव ॥

आर्य गंधव्युहारमव सुधनश्रेष्टदारक कृत भद्रचरी प्रणि धान स्तोत्रं संपूर्णम्
येधर्म्मात्यादि ॥

## भद्रचरीप्रणिधानम

विषयाङ्कः

क्रमाङ्कः ४०

ग्रन्थकारः— सुधनश्रेष्ठिदारकः । नेपालीयं कागतम् । नेवारी लिपि
पङ्क्तयः ५।आकारः १३×२½ । ग्रन्थसंख्या ६१ । पत्रसंख्या ५ पूर्णम् ।

पुष्पिका— आर्य भद्रचरी महाप्रणिधानराजं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu



## भद्रचरीप्रणिधानम्

क्रमाङ्कः ४२ विषयाङ्कः ७०

ग्रन्थकारः— सुधनश्रेष्ठिदारकः 'नेपालीयं कागतम् मागधि लिपिः ' पङ्क्तयः ५ । आकारः १२×२। ग्रन्थसंख्या ७७ । पत्रसंख्या ४। जीर्णम् । अपूर्णम् ।

अन्तिमं वाक्यम्—

येधर्म्मा हेतु प्रभवा हेतु तेषां तथागतो ।
ह्यवदन्तेषाञ्चयो निरोध एवम्वादी महाश्रमणः ॥

देय धर्म्मोयं प्रवर महायानयायिनः परमोपासक लोवापकश्री सुम्पाकस्ययदत्र पुण्यंतद्भवत्वाचार्यो पाध्याय मातापितृ पूर्वङ्गमंकृत्वा सकल सत्व राशे रनुत्तर ज्ञान फलावाप्तय इति ॥

## भद्रचरीप्रणिधानम्

क्रमाङ्कः४३ विषयाङ्कः ७१

ग्रन्थकारः—सुधनश्रेष्ठिदारकः । ताड़पत्राणि । रञ्जना लिपिः । पङ्क्तयः ५ । आकारः १२×२ । ग्रन्थसंख्या२२ । पत्रसंख्या ३ । आद्यन्त खण्डितम् .

## महामेघमहायानसूत्रस्य६५ तमःपरिवर्तः

क्रमाङ्कः १८२ विषयाङ्कः ७२

ग्रन्थकारः– ———— । नेपालीयं कागतम् । नेवारी । लिपिः पङ्क्तयः ५ । आकारः ६×३½ । ग्रन्थसंख्या ४८४। पत्रसंख्या ४४ ।

आदिवाक्यम्—

ॐ नमोचिन्त्यसागराय ॥ नमः सर्वबुद्धबोधिसत्वेभ्यः ॥

एवंमया श्रुतमेकस्मिन्समये भगवान् नन्दोपनन्द नागराजभवने विहरतिस्म ॥ श्रीमणिरत्नगर्भ महामेघ मण्डल कूटागारे महता भिक्षु संघेन सार्द्धं महताच

CC-0. Nepal Sanskrit Academy, Kathmandu



बोधिसत्व संघेन सार्द्धं महता च नागराजगणेन सार्द्धं ।

अन्तिमंवाक्यम्—

महतापूजांकृत्वा अष्टौ समाहमव्यवच्छिन्न प्रवर्न्तयितव्यं देवोवर्षिष्यन्ति ॥

इत्यार्य्य श्रीमहामेघान्महायानसूत्राद्धातमण्डली परिवर्न्तः पञ्चषष्ठितमः परिवर्न्तः।

येधर्माइत्यादि

## महामेघमहायानसूत्रस्य६५तमः परिवर्न्त

क्रमाङ्कः १६०　　　　विषयाङ्कः ७३

ग्रन्थकारः— ———— । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः १३×३½ । ग्रन्थसंख्या ४८४ । पत्रसंख्या ३५ ।

## मध्यान्तविभागकारिकायाः मैत्रेयनाथकृतायाव्याख्या
## ( आगमानुसारी )

क्रमाङ्कः २३३　　　　विषयाङ्कः ७४

ग्रन्थकारः—स्थिरमतिः । ताड़पत्राणि । मागधाक्षरः । पङ्क्तयः ८ । आकारः २२×२ । ग्रन्थसंख्या ३५०८ । पत्रसंख्या ८३ । जीर्णशीर्णा अपूर्णा ।

द्वितीयपत्रस्य आदिवाक्यम्—

एतच्चद्वयमपि सर्वस्मिन् महायान सर्वस्मिंश्च तद्व्याख्यान विद्यते नान्य त्रयेत एतच्छास्त्रं आहच ।

अन्तिमं वाक्यम्—

अत्रा सानुन्नतय विपर्यासेन पुद्गल धर्म्मानभि निवेशतो निरावरणो निर्यातीति ।

पुष्पिकावाक्यानि—

———ख्यानत आवरण परिच्छेदो द्वितीयः समाप्तः ।

———टीकायामाचार्य स्थिरमत्पुप परचिन्तायां तत्वपरिच्छेद स्तृतीयःसमाप्तः ।

CC-0. Nepal Sanskrit Academy, Kathmandu



—टीकायामाचार्य स्थिरमत्युपरचित्तायां फलनिर्देशोनाम चतुर्थपरिच्छेदः समाप्तः ।

समाप्ता चेयं आगमानुसारिणी न्धरा तनिरागा ि ा आचार्य स्थिरमत्यु परचित्ता—— विंशति सहस्रिकायां हृदयं समाप्तम् ॥

## महाकर्मविभङ्गः

क्रमाङ्कः २६५ विषयाङ्कः ७५

ग्रन्थकारः– ————— । मध्यदेशीयं कागतम् । देवनारी लिपिः पङ्क्तयोऽनियता । आकारः । ग्रन्थसंख्या १२६५ पत्रसंख्या ३७ ।

आदिवाक्यम्—

ॐ नमो भगवते मञ्जुश्रिये कुमारभूताय

शंखक्षीरेन्दुकुन्द स्फटिक हिमदलं क्षौम शुभ्राभ्र गौरै
श्चञ्चत्स्पष्टा इहशौगंगनतल गर्तश्छत्र पंङ्त्य—
स्तव्यै र्भू आत्रिपस्पनरगु त्रिदश [ ग ] रुत्सिद्ध गन्धर्वजुष्टैः
प्रहाष्टं [ स्त ] सर्व एव प्रणमत सततं बुद्धमादित्यवन्धुम ॥

दिव्यैश्चन्दने चूर्णमिश्र निकरै मन्दानिलोद्भासितै–
वींणा वेणु मृदङ्ग दुंन्दुभिरवै गंन्धर्व गीति स्वनैः ।
योजात क्षितिपालकः प्रवलयं कृत्स्नं त्रिलोकालयं
सर्वज्ञाय निरुद्ध सर्व गतये वुद्धाय तस्मै नमः ॥

भगवता सूत्रं भाषितम् .. एवंमया श्रुतं एकस्मिन्समये भगवान् श्रावस्त्यां विहरतिस्म । जेतवने अनाथपिण्डदस्यारामे । अथ भगवान् पूर्वाह्णे निवास्य पात्र चीवरमादाय श्रावस्त्यां पिण्डाय प्राविशत् ।

अन्तिमं वाक्यम्—

सङ्ग्रहसार कर्मविभङ्ग सर्वसार कर्मणां हीनोत्कृष्ट मध्यमानि विस्तरेण कथासु

CC-0. Nepal Sanskrit Academy, Kathmandu



स्थानि दर्शितानि । तस्मादपि महाकर्मविभङ्गः । गोत्रान्तरीयाखामभिधर्मक संयुक्तेषु ।

महाकर्मविभङ्गो ना न, [म] समाप्तः ॥

श्रेयोऽस्तु संवत् ५३१ मार्गशिर मासे शुक्लपक्षे त्रयोदश्यां तिथौ रोहिणीनक्षत्रे शुभघटि २ सुकर्मयोगे अङ्गारवासरे— — — त्व अनुराधाफ १ प्राप्त भवतु । श्रीश्रीराजाधिराजपरमेश्वर परमभट्टारक ज — — — विजयराज्ये ॥ ॥ यजमान श्रियं ग्रु यो या श्रीगाङ्गलगे श्रीश्रीषड्क्षरीमहाविहार शाक्यभिक्षु श्री — — — — मम लिख्यते ॥

## महायानसूत्रालङ्कारः

क्रमाङ्कः २०१ विषयाङ्कः ७६

ग्रन्थकारः— — । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ६ । आकारः १२×५ । ग्रन्थसंख्या १०८८ । पत्रसंख्या १४५ ।

आदि वाक्यम्—

नमः सर्वबुद्धबोधिसत्वेभ्यः

अर्थज्ञोऽर्थ विभावनां प्रकुरुते वाचापदैश्चामलै-
दुःखस्योत्तरणाय दुःखितजने कारुण्यतस्तन्मयः ।
धर्मस्योत्तम यान देशित विधेः सत्वेषु तद्गामिषु
श्लिष्टामर्थगतिं निरुत्तरगतां पञ्चात्मिकां दर्शयन् ॥

अर्थज्ञोऽर्थं विभावनां प्रकुरुते महायानोपदेशमारभ्यः कोलं करोति । अर्थज्ञः कमलंकारमलं करोति । अर्थ विभावनां प्रकुरुते ।

अन्तिमं वाक्यम्—

पर्षत्मंडलेष्वपि दृश्यमान भोगिकेन कायेन । सर्वथा चादृश्यमानता धर्मकायेनेति त्रिविधा प्रभेदवृत्तिरिति ॥

CC-0. Nepal Sanskrit Academy, Kathmandu



पुष्पिका वाक्यानि—

महायानसूत्रालंकारे महायान सिद्धाधिकारः प्रथमः ।

महायानसूत्रालंकारे शरणगमनाधिकारो द्वितीयः ।

" गोत्राधिकारस्तृतीयः ।

" चित्तोत्पादाधिकार श्चतुर्थः ।

" प्रतिपत्त्यधिकारः पञ्चमः ।

" तत्वाधिकारः षष्ठः ।

प्रभावाधिकार महायानसूत्रालंकारे सप्तमः ।

महायानसूत्रालंकारे परिपाकाधिकारोऽष्टमः ।

" बोध्यधिकारो नवमः ।

" अधिमुक्त्यधिकारो दशमः ।

" धर्मपर्येष्ट्याधिकार एकादशः ।

" देशनाधिकारो द्वादशः ।

" प्रतिपत्त्यधिकारस्त्रयोदशः ।

" अववादानुशासन्यधिकार श्चतुर्दशः ।

" पारमिताधिकार समाप्तः ।

" पूजासेवाऽप्रमाणाधिकारः समाप्तः ।

" बोधिपक्षाधिकारः समाप्तः ।

" गुणाधिकारः समाप्तः ।

